अ॰को॰ श्रीगणेशायनमः ॥ ॥ यस्यज्ञानदयासिंधोरगाधस्यानघागुणाः ॥ सेव्यतामक्षयोधीराः
१ सश्रियेचामृतायच ॥ समाहृत्यान्यतंत्राणिसंक्षिप्तैःप्रतिसंस्कृतैः ॥ संपूर्णमुच्यतेवर्गैर्ना
मलिंगानुशासनं ॥ २ ॥ प्रायशोरूपभेदेनसाहचर्याच्चकुत्रचित् ॥ स्त्रीपुंनपुंसकंज्ञेयंतद्वि
शेषविधेःक्वचित् ॥ ३ ॥ भेदाख्यानायनद्वंद्वोनैकशेषोनसंकरः ॥ कृतोत्रभिन्नलिंगाना
मनुक्तानांक्रमादृते ॥ ४ ॥ त्रिलिंग्यांत्रिष्वितिपदंमिथुनेतुद्वयोरिति ॥ निषिद्धलिंगंशेषार्थंत्व
ताथादिनपूर्वभाक् ॥ ५ ॥ स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाः ॥ सुरलोकोद्योदिवौद्वे
स्त्रियांक्लीबेत्रिविष्टपं ॥ ६ ॥ अमरानिर्जरादेवास्त्रिदशाविबुधाःसुराः ॥ सुपर्वाणःसुमनस
स्त्रिदिवेशादिवौकसः ॥ ७ ॥ आदितेयादिविषदोलेखाअदितिनंदनाः ॥ आदित्याऋभवो
स्वप्नाअमर्त्याअमृतांधसः ॥ ८ ॥ बर्हिर्मुखाःक्रतुभुजोगीर्वाणादानवारयः ॥ वृंदारकादैव

तानिपुंसिनादेवतास्त्रियां॥ ९॥ आदित्यविश्ववसवस्तुषिताभास्वरानिलाः॥ महाराजिक
साध्याश्चरुद्राश्चगणदेवताः॥ १०॥ विद्याधराप्सरोयक्षरक्षोगंधर्वकिंनराः॥ पिसाचो
गुह्यकःसिद्धोभूतोमीदेवयोनयः॥ ११॥ असुरादैत्यदैतेयदनुजेन्द्रारिदानवाः॥ शुक्रसि
ष्याःदितिसुताःपूर्वदेवाःसुरद्विषः॥ १२॥ सर्वज्ञःसुगतोबुद्धोधर्मराजस्तथागतः॥ समंत
भद्रोभगवान्मारजिल्लोकजिज्जिनः॥ १३॥ षडभिज्ञोदशबलोद्वयवादीविनायकः॥ मुनी
न्द्रःश्रीघनःशास्तामुनिःशाक्यमुनिस्तुयः॥ १४॥ सशाक्यसिंहःसर्वार्थसिद्धःसौद्धोदनिश्चसः॥
गौतमश्चार्कबंधुश्चमायादेवीसुतश्चसः॥ १५॥ ब्रह्मात्मभूःसुरज्येष्ठःपरमेष्ठीपितामहः॥
हिरण्यगर्भोलोकेशःस्वयंभूश्चतुराननः॥ १६॥ धाताब्जयोनिर्द्रुहिणोविरिंचिःकमला
सनः॥ स्रष्टाप्रजापतिर्वेधाविधाताविश्वसृग्विधिः॥ १७॥ विष्णुर्नारायणःकृष्णोवैकुं

ख.२ ठो विष्टरश्रवा॥ दामोदरो हृषीकेशः केशवो माधवः स्वभूः॥१८॥ दैत्यारिः पुंडरिकाक्षो गोविं
२ दो गरुडध्वजः॥ पीतांवरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्द्दनः॥१९॥ उपेंद्र इन्द्रावरजः चक्रपा
णिश्चतुर्भुजः॥ पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥२०॥ देवकीनंदनः शौरिश्रीपतिः
पुरुषोतमः॥ वनमाली वलिध्वंसी कंसारातिरधोक्षजः॥२१॥ विश्वंभरः कैटभजिद्विधुः श्री
एते नारायणनाम — अस्य पितो — एते वसुदेवनाम
वत्सलांछनः॥ वसुदेवोऽस्य जनकः स एवानकदुंदुभिः॥२२॥ वलभद्रः प्रलंवघ्नो वल
देवोऽच्युताग्रजः॥ रेवतीरमणो रामः कामपालो हलायुधः॥२३॥ नीलाम्वरो रौहिणे रामः
एते वलभद्रनाम
यस्तालांको मुशली हली॥ संकर्षणः सीरपाणिः कालिंदीभेदनो वलः॥२४॥ मदनो म २

न्मथो मारः प्रद्युम्नो मीनकेतनः ॥ कंदर्प्पो दर्प्पको ऽनंगः कामः पंचशरः स्मरः ॥२५॥ संवरारि

स्तेकामनामः

र्मनसिजः कुसुमेषुरनन्यजः ॥ पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥२६॥ ब्रह्मसूर्विश्वकेतु

अनिरुद्धनाम

स्यादनिरुद्ध उषापतिः ॥ लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥२७॥ इंदिरा लोकमाता

लक्ष्मीनाम कृष्णस्य शंखनाम

मा क्षीराब्धितनया रमा ॥ क्षीरोदतनया मात शारङ्ग गौरी निसा स्मृता ॥२८॥ शंखो लक्ष्मीपतेः

कृष्णस्य चक्रनाम गदानाम खड्गनाम कृष्णस्य मणिनाम

पांचजन्यश्चक्रं सुदर्शनं ॥ कौमोदकी गदा खड्गो नंदकः कौस्तुभो मणिः ॥२९॥ गरुत्मान्गरुडस्ता

गरुडस्यनाम

र्क्ष्यो वैनतेयः खगेश्वरः ॥ नागांतको विष्णुरथः सुपर्णः पंनगासनः ॥३०॥ शंभुरीशः पशुपतिः

शिवः शूली महेश्वरः ॥ ईश्वरः शर्व ईशानः शंकरश्चंद्रशेखरः ॥३१॥ भूतेशः खंडपरशुर्गिरीशो

२५. गिरिशो मृडः ॥ मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥३२॥ उग्रः कपर्द्दी श्रीकंठः
३ शितिकंठ कपालभृत ॥ वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥३३॥ कृशानुरेताः सर्वज्ञो
धूर्ज्जटिर्न्नीललोहितः ॥ हरः स्मरहरो भर्गस्त्र्यंवकस्त्रिपुरांतकः ॥३४॥ गंगाधरोऽन्धकरि
माहादेवनाम　अस्य महादेवस्य जटाजूटनाम
पुः क्रतुध्वंसी वृषध्वजः ॥ व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥३५॥ कपर्द्दोऽस्य ज
महादेवस्य धनुनाम　ब्रह्माण्यादि मातृनाम
टाजूटः पिनाकोऽजगवं धनुः ॥ प्रमथास्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥३६॥ ब्राह्मी
ऐश्वर्य्यनामः
माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही चैव माहेन्द्री चामुंडा सप्तमातरः ॥३७॥ विभू राम
तिर्भूतिरैश्वर्यमणिमादिकमष्टधा ॥ उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥३८॥ शिवा ३

पार्वतीनामः

भवानीरुद्राणीसर्वाणीसर्वमंगला॥अपर्णापार्वतीदुर्गामृडानीचंडिकांबिका॥३९॥विना

गणेशनाम

यकोविघ्नराजद्वैमातुरगणाधिपाः॥अप्येकदंतोहेरंबलंबोदरगजाननाः॥४०॥कार्त्तिकेयोमा

हासेनःशरजन्माषडाननः॥पार्वतीनंदनःस्कंदःसेनानीरग्निभूर्गुहः॥४१॥बाहुलेयस्तारकजि

कुमारस्यनाम

द्विशाखःशिखिवाहनः॥षाण्मातुरःशक्तिधरःकुमारःक्रौंचदारणः॥४२॥इन्द्रोमरुत्वान्मघवा

बिडौजाःपाकशासनः॥वृद्धश्रवाःसुनासीरःपुरुहूतःपुरंदरः॥४३॥जिष्णुर्लेखर्षभःशक्रःश

तमन्युर्दिवस्पतिः॥सुत्रामागोत्रभिद्वज्रीवासवोवृत्रहावृषा॥४४॥वास्तोष्पतिःसुरपतिर्ब

लारातिःशचीपतिः॥जंभभेदीहरिहयःस्वाराण्नमुचिसूदनः॥४५॥संक्रंदनोदुश्च्यवनस्तुरा

इन्द्राणीनाम
अ॰ षाण्मेघवाहनः॥ आखंडलः सहस्राक्षः ऋभुक्षास्तस्य तु प्रियः॥४६॥ पुलोमजा शची इंद्राणी नग

इंद्रनगरीनाम इंद्रस्याश्वनाम इंद्रस्यसारथीनाम इंद्रस्यवननाम
४ री त्वमरावती॥ हय उच्चैःश्रवाः सूतो मातलीर्नंदनं वनं॥४७॥ स्यात्प्रासादो वैजयंतो जयंतः पाक

ऐरावतहस्तीनाम
शासनिः॥ ऐरावतोभ्रमातंगैरावणाभ्रमुवल्लभाः॥४८॥ ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं

वज्रनाम विमाननाम नारदादिदेवर्षिनाम
पविः॥ शतकोटिः स्वरुः संबो दंभोलिरशनिर्द्वयोः॥४९॥ व्योमयानं विमानोस्त्री नारदाद्याः सुर

देवसभानाम अमृतनाम आकाशगंगानाम
र्षयः॥ स्यात्सुधर्मा देवसभा पियूषममृतं सुधा॥५०॥ मंदाकिनी वियद्गंगा स्वर्णदी सुरदी

सुमेरुनाम
र्घिका॥ मेरुः सुमेरुर्हेमाद्रि रत्नसानुः सुरालयः॥५१॥ पंचैते देवतरवो मंदारः पारिजातकः॥ रामः

देववृक्षस्यनाम
संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनं॥५२॥ सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ॥ ४

नासत्यावश्विनौदस्रावाश्विनेयौचताबुभौ॥५३॥स्त्रियांबहुष्वप्सरसः स्वर्वेश्याउर्वसीमुखाः [स्वर्वेश्यानाम]
॥घृताचीमेनकारंभाउर्वसीचतिलोत्तमा॥५४॥सुकेसीमंदयेःस्वाद्याःकथ्यंतेऽप्सरसोबु
धैः॥हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौकसां॥५५॥ [गंधर्वनाम] अग्निर्वैश्वानरोवह्निर्वीतिहोत्रोधनंज
यः॥कृपीटयोनिर्ज्वलनोजातवेदास्तनूनपात्॥५६॥बर्हिःसुष्माकृष्णवर्त्माशोचिष्केशउ
षर्बुधः॥आश्रयाशोबृहद्भानुःकृशानुःपावकोनलः॥५७॥रोहिताश्वोवायुसखाशिखावाना
शुशुक्षणिः॥हिरण्यरेताहुतभुग्दहनोहव्यवाहनः॥५८॥सप्तार्चिर्दमुनाशुक्रश्चित्रभानुर्वि [सामान्यअग्निनाम]
भावसुः॥सुचिःपित्तमौर्वस्तुवाडवोवडवानलः॥५९॥ [समुद्रस्याग्निनाम] वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिःशिखा

अ॰ ५

(अग्निकणकानाम) (अग्नितेजस्य नाम)

स्त्रियां ॥ त्रिषु स्फुलिंगोऽग्निकणः संतापः सज्वरः समौ ॥६०॥ धर्म्मराजः पितृपतिः समवर्त्ती प

(यमराजस्य नामः)

रेतराट् ॥ कृतांतो यमुनाभ्राता शमनो यमराड् यमः ॥६१॥ कालो दंडधरः श्राद्धदेवो वैवस्वतो

ऽतकः ॥ राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ॥६२॥ रात्रिंचरो रात्रिचरः कर्बुरो नि

(राक्षस नाम)

कषात्मजः ॥ यातुधानः पुण्यजनो नैरृतो यातु रक्षसी ॥६३॥ प्रचेता वरुणः पाशी यादसां

(वरुण नाम)

पतिरप्पतिः ॥ श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥६४॥ पृषदश्वो गंधवहो गंधवा

हानिलाशुगाः ॥ समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥६५॥ नभस्वद्वातपवनपव राम:

(वायुनाम) (शरीरव्यापीवायु नाम)

मानप्रभंजनाः ॥ प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥६६॥ शरीरस्था इमे र ५

वेगस्यनाम:

हस्तरसीतुरयःस्यदः॥हृदिप्राणोगुदेऽपानःसमानोनाभिसंस्थितः॥६७॥उदानःकंठदेशेस्या

द्व्यानसर्वशरीरगः॥यवोऽथशीघ्रंत्वरितंलघुक्षिप्रमरंद्रुतं॥६८॥सत्वरंचपलंतूर्णमविलंबि

शीघ्रस्यनाम: वारंवारस्यनाम

तमाशुच॥सततेऽनारतश्रांतसंततऽविरतानिशं॥६९॥नित्यानवरताज[redacted]मप्यथातिश

दृढकोमलस्यनाम:

योभरः॥अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं॥७०॥तीव्रैकांतनितांतानिवाढगाढदृढा

निच॥क्लीवेशीघ्राद्यसत्वेस्यात्त्रिष्वेषांसत्वगामियत्॥७१॥कुवेरस्त्र्यंवकसखोयक्षराड्गुह्यकेश्व

रः॥मनुष्यधर्माधनदोराजराजोधनाधिपः॥७२॥किंनरेशोवैश्रवणःपौलस्त्योनरवाहनः॥

कुवेरपुत्रनाम: कुवेरस्यस्थाननाम

यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वराः॥७३॥अस्योद्यानंचैत्ररथंपुत्रस्तुनलकूवरः॥कैलासः

कुवेरस्यनाम: कुवेरस्य[redacted]वननाम

कुबेरस्यपुरिनाम कुबेरस्यविमाननाम प्राचीनं२ किंनरस्यनाम भंडारस्यनामः

श्री· स्थानमलकापूर्विमानेतुपुष्पकं॥७४॥स्यात्किंनरःकिंपुरुषःस्तुरंगवदनोमयुः॥निधिर्नाशे

६ वधिर्भेदाःपद्मशंखादयोनिधेः॥७५॥प्रतीच्यांभवंप्रतीचीनंप्राग्भवंत्रिषु॥अवाग्भवमवा

चीनमुदीचीनमुदग्भवं॥७६॥ ॥इतिस्वर्गवर्गः॥ ॥द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्कर

मंबरं॥नभोंतरिक्षंगगनमनंतंसुरवर्त्मखं॥१॥वियद्विष्णुपदंवातुपुंस्याकाशविहाय

सी॥विहायसोपिनाकोपिद्युरपिस्यात्तदव्ययं॥२॥ ॥इतिव्योमवर्गः॥ दिशस्तुककुभःकाष्ठा

दशदिशास्यनाम

आशाश्चहरितश्चताः॥प्राच्यवाचीप्रतीच्यस्ताःपूर्वदक्षिणपश्चिमाः॥१॥उत्तरादिगुदीची राम:

स्याद्दिश्यंतुत्रिषुदिग्भवे॥रविःशुक्रोमहीसूनुःस्वर्भानुर्भानुजोविधुः॥२॥बुधोबृहस्पति ६

श्चैंद्रीशाभीशोरस्तथाग्रहाः॥इन्द्रोवह्निः पितृपतिर्नैरृतोवरुणोमरुत्॥३॥कुवेरईशःपत
यःपूर्वादीनांदिशांक्रमात्॥ऐरावतःपुंडरीकोवामनःकुमुदोंजनः॥४॥पुष्पदंतःसार्वभौमः
सुप्रतीकश्चदिग्गजाः॥करिण्योभ्रमुकपिलापिंगलानुपमाःक्रमात्॥५॥ताम्रकर्णीशुभ्रदं
दिग्मंडलस्य मे नाम
तीचांगनाचांजनावती॥क्लीवाव्ययंत्वपदिशंदिशोर्मध्येविदिक्स्त्रियां॥६॥अभ्यंतरंत्वंतरालं
दिग्मंडलस्य नाम
चक्रवालंतुमंडलं॥अभ्रंमेघोवारिवाहःस्तनयित्नुर्बलाहकः॥७॥धाराधरोजलधरस्तडित्वान्वा
मेघनाम
मेघसमूहे कादंबनीस्यात्। मेघभवे अभ्रियं त्रिषु
रिदोंबुभृत्॥घनजीमूतमुदिरजलमुग्धूमयोनयः॥८॥कादंबिनीमेघमालात्रिषुमेघभवे
मेघनिर्घोषे स्तनितं गर्जितं रसितादि
ऽभ्रियं॥स्तनितंगर्जितंमेघनिर्घोषेरसितादिच॥९॥शंपाशतह्रदाह्रादिन्यैरावत्यःक्षणप्र

अ॰ भा॥ तडित्सौदामिनी विद्युच्चंचला चपलाप्यपि॥१०॥ स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः॥
७ इन्द्रायुधं शक्रधनुस्तदेव ऋजुरोहितं॥११॥ वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ॥ धारासं
पात आसारः शीकरोऽम्बुकणाः स्मृता॥१२॥ वर्षोपलस्तु करका मेघछन्नेऽह्नि दुर्दिनं॥ अंत
र्द्धा व्यवधा पुंसि त्वंतर्द्धिरपवारणं॥१३॥ अपिधानतिरोधानपिधानछादनानि च॥ हिमांशुश्चं
द्रमाश्चंद्र इंदुः कुमुदबांधवः॥१४॥ विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः॥ पालिके तु ध्व
जो लिंगनिमित्तं विंजनं त्रिषु॥ अब्जो जैवातृकः सोमो ग्लौर्मृगांकः कलानिधिः॥१५॥ द्विज राम
राजः शशधरो नक्षत्रेशः क्षपाकरः॥ कलातु षोडशो भागो बिंबोऽस्त्री मंडलं त्रिषु॥१६॥ भित्तं शक ७

चंद्रप्रभायांनाम — निर्मलस्यनाम — कलंकस्य ... पुलिंग

लखंडे वा पुंस्यर्द्धोर्द्धं समेंऽसके ॥ चंद्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ॥१७॥ कलंकां

अतिशयशोभानाम

कौ लांछनं च चिह्नं लक्ष्म च लक्षणं ॥ सुषमा परमा शोभा शोभा कांतिर्द्युतिश्छविः ॥१८॥ अवश्या

यस्तु नीहारस्तुषारस्तुहिनं हिमं ॥ प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ॥१९॥ शीतं गुणे त

हिमसमूहस्यनाम

द्वदर्थाः सुषीमः शिशिरो जडः ॥ तुषारः शीतलः शीतो हिमः सप्तान्यलिंगकाः ॥२०॥ ध्रुव औत्तानपा

दिः स्यादगस्त्यः कुंभसंभवः ॥ मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ॥२१॥ नक्षत्रमृक्षं भं तारा ता — पुष्यनाम

अगस्तिनाम — अश्विनीनाम — विशाखानाम

रकाप्युडु वा स्त्रियां ॥ दाक्षायण्योऽश्विनीत्यादि तारा अश्वयुगश्विनी ॥२२॥ राधा विशाखा पुष्ये तु सिध्यतिष्यौ

धनिष्ठानाम — पूर्वभाद्रनाम — मृगशीरस्यनाम

श्रविष्ठया ॥ समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ॥२३॥ मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहाय

मृगशिरस्य शिरस्य नक्षत्राणां नाम इल्वला

स्व॰ णी॥ इल्वलास्तच्छिरोदेशे तारका निवसंति याः॥२४॥ बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः॥ जी

बृहस्पतिनाम शुक्रस्यनाम

८ र वआंगिरसो वाचस्पतिश्चित्रशिखंडिजः॥२५॥ शुक्रो दैत्यगुरुः काव्यं उशना भार्गवः कविः॥ अंगा

भौमस्यनाम बुधस्यनाम शनैश्चरस्यनाम

रकः कुजो भौमो लोहितांगो महीसुतः॥२६॥ रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ॥

शनिर्मंदो पंगु कालो छायापुत्रो सितश्च स॥२७॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः॥ केत

वः शिखिभिः प्रोक्ते अप्रदिस्तनु कथ्यते॥२८॥ सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखंडिनः॥ राशि

नामुदयो लग्नं ते तु मेषवृषादयः॥२९॥ सूरसूर्यार्यमादित्यद्वादशात्मादिवाकरः॥ भास्करा एमः

हस्करब्रध्नप्रभाकरविभाकरा॥३०॥ भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः॥ विकर्तनार्क ८

मार्तंडमिहिरारुणपूषणः॥३१॥द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः॥विभावसुर्ग्रहपति
स्त्विषांपतिरहर्पतिः॥३२॥भानुर्हंसः सहस्रांशुस्तपनः सविता रविः॥कर्म्मसाक्षीजगच्चक्षु
र्लोकबंधुस्त्रयीतनुः॥३३॥दैत्यहापापहर्ता च धर्म्मो धर्म्मप्रकाशकः॥माठरः पिंगलो दंडश्चंडां
शोः पारिपार्श्वकाः॥३४॥सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः॥परिवेषस्तु परिधिरुपसू
र्यकमंडले॥३५॥किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः॥भानुः करो मरीचिः स्त्रीपुंसयो
र्दीधितिः स्त्रियां॥३६॥स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविर्द्युतिदीप्तयः॥रोचिः शोचिरुभे क्लीबे प्रका
शो द्योत आतपः॥३७॥कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वति॥ तिग्मं तीक्ष्णं खरं तद्वन्मृगतृ

स्प॰ श्यामरिश्चिका॥३०॥ इति दिग्वर्गः॥ ॥ कालो दिष्टोप्यनेहापि समयोप्यथ पक्षतिः॥ प्रतिपद्द्वे इमे
स्त्रीत्वे तदाद्यास्तिथयो द्वयोः॥१॥ घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ॥ प्रत्यूषोहर्मुखं कल्प
मुषः प्रत्युषसी अपी॥२॥ प्रभातं च दिनांते तु सायं सध्यापितृप्रसूः॥ प्राह्णापराह्णमध्याह्नास्त्रि
सध्यमथ सर्वरी॥३॥ निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा॥ विभावरीतमस्विन्यौ रज
नी यामिनी तमी॥४॥ तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चंद्रिकयान्विता॥ आगामिवर्तमानाहर्युक्ता
यां निशि पक्षिणी॥५॥ गणरात्रं निशा वह्व्यः प्रदोषो रजनीमुखं॥ अर्द्धरात्रनिशीथौ द्वौ द्वौ यामप्रह रा॰
रौ समौ॥६॥ स पर्वसंधिः प्रतिपत्पंचदश्योर्यदंतरं॥ पक्षांतौ पंचदश्यौ द्वे पौर्णमासी तु ९

पूर्णिमा ॥७॥ कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥ अमावास्या त्वमावस्या दर्शः सूर्ये
न्दुसंगमः ॥८॥ सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ॥ उपरागो ग्रहो राहुग्रस्ते त्विन्दौ
च पूष्णि च ॥९॥ सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ॥ एकयोक्त्या पुष्पवंतौ दिवाकरनिशाक
रौ ॥१०॥ अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ॥ तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियां
॥११॥ ते तु त्रिंशदहोरात्रः पक्षस्ते दश पंच च ॥ पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ॥१२॥ द्वौ
द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः ॥ अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥१३॥ सम
रात्रिंदिवे काले विषुवद्विषुवं च तत् ॥ पुष्ययुक्ता पूर्णमासी पौषी मासे तु यत्र सा ॥१४॥ नाम्ना

अ॰ सपौषोमाघाद्याश्चैवमेकादशापरे॥मार्ग्गशीर्षेसहामार्ग्गआग्रहायणिकश्चसः॥१५॥पौषे
१० तैषसहस्यौद्वौतपामाघेथफाल्गुणे॥स्यात्तपस्यःफाल्गुणिकःस्याच्चैत्रेचैत्रिकोमधुः॥१६॥
वैशाखेमाधवोराधोज्येष्ठेशुक्रःशुचिस्त्वयं॥आषाढेश्रावणेतुस्यान्नभाःश्रावणिकश्चसः॥
१७॥स्युर्न्नभस्यप्रौष्ठपदभाद्रभाद्रपदासमाः॥स्यादाश्विनइषोप्याश्वयुजोपिस्यात्तुकार्त्तिके
॥१८॥बाहुलोर्जौकार्त्तिकिकोहेमंतःशिशिरोस्त्रियां॥वसंतेपुष्पसमयःसुरभीग्रीष्मऊष्म
कः॥१९॥निदाघउष्णोपगमउष्णउष्मागमस्तपः॥स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाअथश रामः
रत्स्त्रियां॥२०॥षडमीऋतवःपुंसिमार्ग्गादीनांयुगैःक्रमात्॥संवत्सरोवत्सरोब्दोहायनोऽस्त्री १०

शरत्समाः॥२१॥मासेनस्यादहोरात्रःपैत्रोवर्षेणदैवतः॥दैवेयुगेसहस्रेद्वेब्राह्मःकल्पौ
तुतौनृणां॥२२॥मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः॥संवर्त्तःप्रलयःकल्पःक्षयः
कल्पांतइत्यपि॥२३॥अस्त्रीपंकःपुमान्पाप्मापापंकिल्बिषकल्मषं॥कलुषंवृजिनैनोघ
महोदुरितदुष्कृतं॥२४॥स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषः॥मुत्प्रीतिःप्रमदोहर्षः
प्रमोदामोदसंमदाः॥२५॥स्यादानंदथुरानंदःशर्मशातसुखानिच॥निश्रेयसंशिवंभद्रंक
ल्याणंमंगलंशुभं॥२६॥भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियं॥शस्तंचाथत्रिषुद्रव्ये
पापंपुण्यंसुखादिच॥२७॥मतल्लिकामचर्चिकाप्रकांडमुद्धतल्लजौ॥प्रशस्तवाचकान्यमु

श्र न्पयःशुभावहोविधिः॥२८॥दैवंदिष्टंभागधेयंभाग्यंस्त्रीनियतिर्विधिः॥हेतुर्नाकारणंबी
११ जंनिदानंत्वादिकारणं॥२९॥क्षेत्रज्ञआत्मापुरुषःप्रधानंप्रकृतिःस्त्रियां॥विशेषःकालि
कोवस्थागुणाःसत्वंरजस्तमः॥३०॥जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः॥प्राणीतुचेत
नोजन्मीजंतुजन्युःशरीरिणः॥३१॥चित्तंतुचेतोहृदयंस्वांतंहृन्मानसंमनः॥इतिकालवर्गः॥
बुद्धिर्मनीषाधिषणाधीःप्रज्ञाशेमुषीमतिः॥प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः
॥१॥धीर्धारणावतीमेधासंकल्पःकर्ममानसं॥चित्ताभोगोमनस्कारश्चर्चासंख्यावि रामः
चारणा॥२॥अध्याहारस्तर्कऊहोविचिकित्सातुसंशयः॥संदेहद्वापरौचाथसमौनिर्णय ११

निश्चयो॥३॥मिथ्यादृष्टि नास्तिकताव्यापादोद्रोहचिंतनं॥समौसिद्धांतराद्धांतौभ्रांतिर्मिथ्यामति
भ्रमः॥४॥संविदागूः प्रतिज्ञानंनियमाश्रवसंश्रवाः॥अंगीकाराभ्युपगमप्रतिश्रवसमाध
यः॥५॥मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशास्त्रशिल्पयोः॥मुक्तिःकैवल्यंनिर्वाणश्रेयोनिःश्रे
यसामृतं॥६॥मोक्षोपवर्गोथाज्ञानंमोहोविद्याप्यहंमतिः॥रूपंशब्दोरसस्पर्शगंधाश्चवि
षयाश्चमी॥७॥गोचरादृद्रियार्थाश्चहृषीकंविषयीन्द्रियं॥कर्मेद्रियंतुपाय्वादिमनोनेत्रा
दिधीन्द्रियं॥८॥तुवरस्तुकषायोस्त्रीमधुरोलवणःकटुः॥तिक्तोम्लश्चरसाःपुंसितद्वत्सुषड
मीत्रिषु॥९॥विमर्द्दोत्थेपरिमलोगंधेजनमनोहरे॥आमोदःसोतिनिर्हारीवाच्यलिंग

ख· त्वमायुराणत॥१०॥समाकर्षीतुनिर्हारिसुरभीर्घ्राणतर्पणः॥इष्टगंधिः सुगंधिःस्यादामो
१२ दिमुखवासनः॥११॥पूतिगंधिस्तुदुर्गंधोविस्रंस्यादामगंधियत्॥शुक्लशुभ्रसुचीश्वेत
विशदश्येतपांडुरा॥१२॥अवदातःसितोगौरोवलक्षोधवलोऽर्जुनः॥ हरिणः पांडुरः पांडुरीष
त्पांडुस्तुधूसरः॥१३॥कृष्णेनीलाःसितस्यामकालस्यामलमेचकाः॥पीतोगौरोहरिद्राभःपा
लासोहरितोहरित्॥१४॥लोहितोरोहितोरक्तःशोनःकोकनदछविः॥अव्यक्तरागस्त्वरुणः
श्वेतरक्तस्तुपाटलः॥१५॥श्यावःस्यात्कपिशोधूम्रधूमलौकृष्णलोहिते॥कडारःकपिलःपिं रम
गपिसंगौकद्रुपिंगलौ॥१६॥चित्रंकिर्मीरकल्माषसबलौसाश्च~~स्वस्वी॥ध्वानास्तुतिर्यस्पिनं~~ १२
कर्बुरे॥

गुणेशुक्लादयःपुंसिगुणिलिंगास्तुतद्वति॥१७॥इतिबुद्धिवर्गः॥ब्राह्मीतुभारतीभाषागीर्वाग्वा
णीसरस्वती॥व्याहारउक्तिर्लपितंभाषितंवचनंवचः॥१॥अपभ्रंशोपशब्दःस्याच्छास्त्रेशब्दस्तु
वाचकः॥तिङ्सुबंतचयोवाक्यंक्रियावाकारकान्विता॥२॥श्रुतिस्त्रीवेदआम्नायस्त्रयीधर्मस्तु
तद्विधिः॥स्त्रियामृक्सामयजुषीइतिवेदास्त्रयस्त्रयी॥३॥शिक्षेत्यादिश्रुतेरंगमोंकारप्रणवौ
समौ॥इतिहासःपुरावृत्तमुदात्ताद्यास्त्रयस्वराः॥४॥आन्वीक्षिकीदंडनीतिस्तर्कविद्यार्थशा
स्त्रयोः॥आख्यायिकोपलब्धार्थापुराणंपंचलक्षणं॥५॥प्रबंधकल्पनाकथाप्रवह्लिकाप्र
हेलिका॥स्मृतिस्तुधर्मसंहितासमाहृतिस्तुसंग्रहः॥६॥समस्यातुसमासार्थाकिंवदंतीजन

अ॰ श्रुतिः॥ वार्ताप्रवृत्तिर्वृत्तांत उदंतस्यादथाह्वयः॥७॥ आख्याह्वे अभिधानंचनामधेयंचनामच॥ हूति
१३ राकारणाह्वानंसंहूतिर्बहुभिःकृता॥८॥ विवादोव्यवहारःस्यादुपन्यासस्तुवाङ्मुखं॥ उपोद्घा
तउदाहारःशपनंशपथःपुमान्॥९॥ प्रश्नोनुयोगःपृच्छाचप्रतिवाक्योत्तरेसमे॥ मिथ्याभियो
गोभ्याख्यानमथमिथ्याभिशंसनं॥१०॥ अभिशापःप्रणादस्तुशब्दस्यादनुरागजः॥ यशःकी
र्तिसमाज्ञाचस्तवःस्तोत्रंनुतिःस्तुतिः॥११॥ आम्रेडितंद्विस्त्रिरुक्तमुच्चैर्घुष्टंतुघोषणा॥ काकुः
स्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः॥१२॥ अवर्णाक्षेपनिर्वादपरिवादापवादवत्॥ रामः
उपक्रोशोजुगुप्साचकुत्सानिंदाचगर्हणे॥१३॥ पारुष्यमतिवादःस्याद्भर्त्सनंत्वपकारगीः॥ यः १३

सनिंदउपालंभस्तत्रस्यात्परिभाषणं॥१४॥तत्रत्वाक्षारणायःस्यादाक्रोशोमैथुनंप्रति॥स्यादा
भाषणमालापःप्रलापोऽनर्थकं॥१५॥अनुलापोमुहुर्भाषाविलापःपरिदेवनं॥विप्रला
पोविरोधोक्तिःसंलापोभाषणंमिथः॥१६॥सुप्रलापःसुवचनमपलापस्तुनिःह्नव॥संदेशवाग्वा
चिकंस्याद्वाग्भेदास्तुत्रिषूत्तरे॥१७॥उषतीवागकल्याणीस्यात्कल्यातुशुभात्मिका॥अत्यर्थम
धुरंसांतंसंगतंहृदयंगमं॥१८॥निष्ठुरंपरुषंग्राम्यमश्लीलंसूनृतंप्रिये॥सत्येथसंकुलक्लि
ष्टेपरस्परपराहते॥१९॥लुप्तवर्णपदंग्रस्तंनिरस्तंत्वरितोदितं॥अंबूकृतंसनिष्ठेवमबद्धं
स्यादनर्थकं॥२०॥अनक्षरमवाच्यंस्यादाहतंतुमृषार्थकं॥अथम्लिष्टमविस्पष्टंवित

काः २

अ: थत्वनृतंवचः॥२१॥सत्यंतथ्यमृतंसम्यगमूनित्रिषुतद्वति॥शब्देनिनादनिनदध्वनिध्वा

१४ नरवस्वनाः॥२२॥स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिःस्वनाः॥आरवारावसंरावविरावाअ

थमर्मरः॥२३॥स्वनितेवस्त्रपर्णानांभूषणानांतुसिंजितं॥निक्वाणोनिक्वणःक्वाणःक्वणःक्वणन

मित्यपि॥२४॥वीणायाःक्वणितेप्रादेःप्रक्वाणप्रक्वणादयः॥कोलाहलःकलकलस्तिरश्चांवाशि

तंरुतं॥२५॥स्त्रीप्रतिश्रुत्प्रतिध्वानेगीतंगानमिमेसमे॥ ॥इतिशब्दादिवर्गः॥निषादर्षभगां

धारषड्जमध्यमधैवताः॥पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थिताःस्वराः॥१॥काकलीतुकलेसू राम:

क्ष्मेध्वनौतुमधुरास्फुटे॥कलोमंद्रस्तुगंभीरेतारोत्युच्चैस्त्रयस्त्रिषु॥२॥समन्वितलयस्त्वेक १४

तालोवीणातुवल्लकीविपंचीसातुतंत्रीभिःसप्तभिःपरिवादिनी॥३॥ततंवीणादिकंवाद्यमान
द्धंमुरजादिकं॥वंश्यादिकंतुशुषिरंकांस्यतालादिकंघनं॥४॥चतुर्विधमिदंवाद्यंवादि
त्रातोद्यनामकं॥मृदंगामुरजाभेदादंक्यालिंगोर्द्धकास्त्रयः॥५॥स्याद्यशःपटहोढक्काभे
रीमानकदुंदुभी॥आनकःपटहोस्त्रीस्यात्कोणोवीणादिवादनं॥६॥वीणादंडःप्रवालस्या
त्ककुभस्तुप्रसेवकः॥कोलंबकस्तुकायोस्याउपनाहोनिबंधनं॥७॥वाद्यप्रभेदाडमरूमड्डु
डिंडिमझर्झराः॥मर्द्दलःपनवोन्येचनर्तकीलासिकासमे॥८॥विलंबितंद्रुतंमध्यंतत्वमोघो
घनंक्रमात॥तालकालक्रियामानंलयसाम्यमथास्त्रियां॥९॥ताडवंनटनंनाट्यंलास्यन

२प्र॰ त्यंचनर्तने॥ तौर्यत्रिकंनृत्यगीतवाद्यंनाट्यमिदंत्रयं॥१०॥ भ्रुकुंशश्चभ्रुकुंशश्चभ्रूकुंशश्चे
१५ तिनर्तकः॥ स्त्रीवेशधारिपुरुषोनाट्योक्तौगणिकात्रकाः॥११॥ भगिनीपतिरावुत्तोभावो
विद्वानथावुकः॥ जनकोयुवराजस्तुकुमारोभर्तृदारकः॥१२॥ राजाभट्टारकोदेवस्तत्सुता
भर्तृदारिकाः॥ देवीकृताभिषेकायामितरासुतभट्टिनी॥१३॥ अब्रह्मण्यमवध्योक्तौराज
श्यालस्तुराष्ट्रियः॥ अंबामाताथवालास्याद्वासूरार्यस्तुमारिषः॥१४॥ अत्तिकाभगिनीज्ये
ष्ठानिष्ठानिर्वहनेसमे॥ हंजेहंजेहलाह्वानेनीचांचेटींसखिंप्रति॥१५॥ अंगहारोंगविक्षे रामः
पोव्यंजकाभिनयौसमौ॥ निर्वृतेत्वंगसत्वाभ्यांद्वेत्रिष्वांगिकसात्विके॥१६॥ शृंगारवीरकरु १५

णाद्भुतहास्यभयानका॥ बिभत्सरौद्रौच रसाः शृंगारः शुचिरुज्वलः॥१७॥ उत्साहवर्द्धनो
15 करुणारसस्य
हास्यरसस्य
वीरः कारुण्यं करुणा घृणा॥ कृपा दयानुकंपा स्यादनुक्रोशोप्यथो हसः॥१८॥ हासो हास्य
च वीभत्सं विकृतं त्रिष्विदं द्वयं॥ विस्मयोद्भुतमाश्चर्य्यं चित्रमप्यथ भैरवं॥१९॥ दारुणं भीष
णं भिष्मं घोरं भिम भयानकं॥ भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु॥२०॥ चतुर्द्दश
दरत्रासौ भीतिभीसाध्वसं भयं॥ विकारो मानसो भावोनुभावो भावबोधकः॥२१॥ ग
र्वोभिमानोहंकारो मानश्चित्तसमुन्नतिः॥ अनादरः परिभवः परिभावस्तिरस्क्रीया
॥२२॥ रीढावमाननावज्ञावहेलनमसूर्क्षणं॥ मंदाक्षं ह्रीस्त्रपा व्रिडा लज्जा सापत्रपान्य

श्री
१६ तः॥२३॥क्षांतिस्तितिक्षाभिध्यातुपरस्वेविषमस्पृहा॥असूयातुदोषारोपोगु
णेष्वपि॥२४॥वैरंविरोधोविद्वेषोमन्युशोकौतुशुक्स्त्रियां॥पश्चात्तापोऽनुतापश्चवि
प्रतीसारइत्यपि॥२५॥कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौस्त्रियौ॥शुचौतुचरितेशी
लमुन्मादश्चित्तविभ्रमः॥२६॥प्रेमानाप्रियताहार्दंप्रेमस्नेहोथदोहदं॥इच्छाकांक्षास्पृ
हाईहातृड्वांछालिप्सामनोरथः॥२७॥कामोभिलाषस्तर्षश्चसमहान्लालसाद्वयोः॥
उपाधिर्न्नाधर्म्मचिंतापुंस्याधिर्मानसीव्यथा॥२८॥स्याच्चिंतास्मृतिराध्यानमुत्कंठोत्क राम
लिकेसमे॥उत्साहोध्यवसायःस्यात्सवीर्यमतिशक्तिभाक्॥२९॥कपटोस्त्रीव्याज १६

दंभोपधयश्छद्मकैतवे॥कुसृतिःर्निकृतिःशाठ्यंप्रमादोनवधानता॥३०॥कौतु
हलंचकुतुकंकौतुकंचकुहलं॥स्त्रीणांविलासविब्बोकविभ्रमाललितंतथा॥३१॥
हेलालीलेत्यमीहावाःक्रियाशृंगारभावजा॥द्रवकेलिपरिहासाःक्रीडालीला
चनर्म्मच॥३२॥व्याजोपदेशोलक्ष्यंचक्रीडाखेलाचकूर्द्दनं॥घर्मोनिदाघःस्वे
दःस्यात्प्रलयोनष्टचेष्टता॥३३॥अवहित्थाकारगुप्तिःसमौसंवेगसंभ्रमो॥
स्यादाच्छुरितकंहासःसोत्प्राससमनास्मितं॥३४॥मध्यमंस्याद्विहसितंरोमां
चोरोमहर्षणं॥कंदितंरुदितंकुष्टंजंभस्तुत्रिषुजंभनं॥३५॥विप्रलंभोविसंवा

अ॰ दोरिंगणंस्खलनंसमे॥स्यान्निद्राशयनंस्वापःस्वप्नःसंवेशइत्यपि॥३९॥तंद्री
७ प्रमीलाभ्रुकुटिर्भ्रुकुटिर्भ्रूकुटीस्त्रियः॥अदृष्टिःस्यादसौम्येक्षिणसंसिद्धिःप्रकृती
त्विमे॥४०॥स्वरूपंचस्वभावश्चनिसर्गश्चाथवेपथु॥कंपोथक्षणउद्धर्षोमहउद्धव
उत्सवः॥४१॥इतिनाट्यवर्गः॥ ॥अधोभुवनंपातालंबलिसद्मरसातलं॥नागलो
कोथकुहरंशुषिरंविवरंबिलं॥१॥छिद्रंनिर्व्यथनंरोकंरंध्रंश्वभ्रंवपाशुषिः॥गर्तावि
टोभुविश्वभ्रेसरंध्रेशुषिरंत्रिषु॥२॥अंधकारोस्त्रियांध्वांतंतमिस्रंतिमिरंतमः॥ध्वां रामः
तेगाढेंधतमसंक्षीणेवतमसंतमः॥३॥विष्वक्संतमसंनागाःकाद्रवेयास्तदीश्वरः॥ ७

शेषोनंतेवासुकिंस्तुसर्प्पराज्ञोथगोनसे॥४॥तिलित्सः स्यादजगरेशयुर्व्वाहसइत्युभौ॥अ
लगर्द्दोजलव्यालःसमौराजिलडुंडुभौ॥५॥मालुधानोमातुलाहिर्न्निर्मुक्तोमुक्तकंचुकः॥स
र्प्पःपृदाकुर्भुजगोभुजंगोऽहिर्भुजंगमः॥६॥आशीविषोविषधरश्चक्रीव्यालःसरीसृपः॥
कुंडलीगूढपाच्चक्षुःश्रवाःकाकोदरःफणी॥७॥दर्वीकरोदीर्घपृष्ठोदंदशूकोबिलेशयः॥उ
रगःपन्नगोभोगीजिह्मगपवनाशनः॥८॥त्रिष्वाहेयंविषास्थ्यादिस्फटायांतुफणाद्वयोः॥स
मौकंचुकनिर्म्मोकौक्ष्वेडस्तुगरलंविषं॥९॥पुंसिक्लीबेचकाकोलकालकूटहलाहलाः ला २
॥सौराष्ट्रिकःसौक्लिकेयोब्रह्मपुत्रःप्रदीपनः॥१०॥दारदोवत्सनाभश्चविषभेदाअमीनव॥वि

अ०
१८ षवैद्यो जांगुलीको व्याडग्राह्याहितुंडिकः॥ २१॥ इति पातालभोगीवर्गः॥ ॥स्यान्नारकस्तु
नरको निरयो दुर्गतिः स्त्रियां॥ तद्भेदास्तपनावीचिमहारौरवरौरवाः॥ १॥ संघातः कालसूत्रं
चेत्याद्याः सत्वास्तु नारकाः॥ प्रेता वैतरणी सिंधुः स्यादलक्ष्मीस्तु निर्ऋतिः॥२॥ विष्टिराजूः का
रणा तु यातना तीव्रवेदना॥ पीडा बाधा व्यथा दुःखममानस्यं प्रसूतिजं॥३॥ स्यात्कष्टं कृच्छ्र
माभीलं त्रिष्वेषां भेद्यगामि यत्॥ ॥इति नरकवर्गः॥ ॥ ॥समुद्रोऽब्धिरकूपारः पारावारः स
रित्पतिः॥ उदन्वानुदधिः सिंधुः सरस्वान्सागरोऽर्णवः॥१॥ रत्नाकरो जलनिधिर्यादःपतिरपां रामः
पतिः॥ तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे॥४॥ आपः स्त्री भूम्नि वार्वारि सली १८

लंकमलंजलं॥पयःकिलालमम्टतंजीवनंभुवनंवनं॥३॥कबंधमुदकंपाथःपुष्करंसर्वतोमुखं॥
अंभोर्णस्तोयपानीयक्षीरनीरांबुसंवरं॥४॥मेघपुष्पंघनरसस्त्रिषुद्वेआप्यमम्मयं॥भंग
स्तरंगऊर्मिर्वास्त्रियांवीचिरथोर्मिषु॥५॥महत्सूल्लोलकल्लोलौस्यादावर्तोभसांभ्रमः॥पृषं
तिबिंदुपृषताःपुमांसोविप्रुषःस्त्रियां॥६॥चक्राणिपुटभेदास्युर्भ्रमाश्चजलनिर्गमाः॥कूलंरो
धश्चतीरंप्रतीरंचतटंत्रिषु॥७॥पारावारेपरार्वाचीतीरेपात्रंतदंतरं॥द्वीपोस्त्रियामंतरीपंय
दंतर्वारिणस्तटं॥८॥तोयोत्थितंतत्पुलिनंसैकतंसिकतामयं॥निषद्वरस्तुजंबालपंकोस्त्रि
सादकर्दमौ॥९॥जलोच्छासाःपरीवाहाःकूपकास्तुविदारकाः॥नाव्यंत्रिलिंगंनौता

श्र· य्यैस्त्रियांनौस्तरणिस्तरिः॥१०॥उडुपंतुप्लवःकोलस्त्रोतोम्बुसरणंस्वतः॥आतारस्तरप
१९ णंपंस्याद्द्रोणीकाष्ठांबुवाहिनी॥११॥सांयात्रिकःपोतवणिक्कर्णधारस्तुनाविकः॥नियाम
कापोतवाहाःकूपकोगुणवृक्षकः॥१२॥नौकादंडःक्षेपणीस्यादरित्रंकेनिपातकः॥अभ्रिः
स्त्रिकाष्ठकुद्दालःसेकपात्रंतुशेचनं॥१३॥क्लिष्टगाधाःप्रसन्नोच्छःकालुषोऽनछ्छआविलः॥नि
म्नंगभीरंगंभीरमुत्तानंतद्विपर्ययेः॥१४॥अगाधमतलस्पर्शेकैवर्तेदासधीवरौ॥आनाा
यपुंसीजालस्याच्छणसूत्रंपवित्रकं॥१५॥मत्स्याधानीकुवेणीस्याद्बडीशंमत्स्यवेधनं॥पृथु राम·
रोमाझषोमत्स्योमीनोवैशारिणोंडजः॥१६॥विचारसकुलीचाथगडकःसकुलार्भकः॥सहस्र १९

दंष्ट्रः पाठीन उलूपी शिशुकः समौ॥१७॥ नलमीनश्चिलिचीमः प्रोष्ठी तु शफरी द्वयोः॥ क्षुद्रांड
मत्स्यसंघातः पोताधानमथो झषाः॥१८॥ रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः॥
तिमिंगिलादयश्चाथ यादांसि जलजंतवः॥१९॥ तद्भेदाः शिशुमारोद्रशंकवो मकरादयः॥ स्या
त्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ॥२०॥ ग्राहो वहारो नक्रस्तु कुंभीरोथ महीलता॥ गंडू
पदः किंचुलुको निहाका गोधिका समे॥२१॥ रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः॥ मु
क्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कंबुरस्त्रियौ॥२२॥ क्षुद्रशंखाः शंखनखाः शंबूका जलशुक्तयः॥
भेके मंडूकवर्षाभूशालूरप्लवदर्दुराः॥२३॥ शिलिगंडूपदी भेकी वर्षाह्वी कमठी दुलिः॥ मद्गुरस्य
प्रियाशृंगी दुर्नामा दीर्घकोशिका॥२४॥ जलाशयो जलाधारस्तत्रागाधजलो ह्रदः॥ आहाव
स्तु निपानं स्यादुपकूपजलाशये॥२५॥ पुंस्येवांधुः प्रहिः कूप उदपानं तु पुंसि वा॥ नेमिस्त्रीका

ख॰ स्यवीनाहोमुखवंधनमस्ययत् ॥२६॥ पुष्करिण्यांतुखातंस्यादखातंदेवखातकं ॥ पद्माकर
२० स्तडागोऽस्त्रीकासारस्सरसीसरः ॥२७॥ विशंतः पल्वलंचाल्पसरोवापीतुदीर्घिका ॥ खेयं
तुपरिखाधारस्त्वंभसांयत्रधारणं ॥२८॥ स्यादालवालमावालमावापोथनदीसरित्
तरंगिनीशैवलीनीतटिनीह्रदिनीधुनी ॥२९॥ स्रोतस्वतीद्वीपवतीस्रवंतीनिम्नगापगा ॥ गं
गाविष्णुपदीजह्नुतनयासुरनिम्नगाः ॥३०॥ भागीरथीत्रिपथगात्रिस्रोताभीष्मसूरपि ॥ का
लिंदीसूर्यतनयायमुनाशमनस्वसा ॥३१॥ रेवातुनर्मदासोमोद्भवामेकलकन्यका ॥ क
रतोयासदानीराबाहुदाशैतवाहनी ॥३२॥ शितद्रुस्तुशतद्रुःस्याद्विपाशातुविपाट्स्त्रियां
शोणोहिरण्यबाहुःस्यात्कुल्याल्पाकृत्रिमासरित् ॥३३॥ शरावतीवेत्रवतीचंद्रभागासरस्व रामः
ती ॥ कावेरितोन्याश्चसंभेदःसिंधुसंगमः ॥३४॥ द्वयोःप्रणालीपयसःपदव्यांत्रिषुतूत्तरौ ॥ दे २०

वीकायां सरघाप्रभवे दार्विकसारवैः ॥३५॥ सौगंधिकं तु कह्लारं हल्लकं रक्तसंध्यकं ॥ स्यादुत्प
लं कुवलयमथ नीलांबुजन्म च ॥३६॥ इन्दीवरं च नीलेस्मिन्सिते कुमुदकैरवे सालूकमेषां
कंदः स्याद्वारिपर्णी तु कुंभिका ॥३७॥ जलनीली तु शैवालं शैवालोथ कुमुद्वती ॥ कुमुदिन्यां
नलिन्यां तु बिसिनीपद्मिनीमुखाः ॥३८॥ वा पुंसि पद्मं नलिनमरविंदं महोत्पलं ॥ सहस्रपत्रं
कमलं शतपत्रं कुशेशयं ॥३९॥ पंकेरुहं तामरसं सारसं सरसीरुहं ॥ बिसप्रसूनराजीवपुष्क
रांभोरुहाणि च ॥४०॥ पुंडरीकं सितांभोजमथ रक्तसरोरुहे ॥ रक्तोत्पलं कोकनदं नालो नालमथास्त्रि
यां ॥४१॥ मृणालं बिसमब्जादिकदंबे षंडमस्त्रियां ॥ करहाटः शिफाकंदः ॥ किंजल्कः केश
रोऽस्त्रियां ॥४२॥ संवर्तिका नवदलं बीजकोषो वराटकः ॥ उक्तं स्वर्व्योमदिक्कालधीशब्दादि
सनाट्यकं ॥४३॥ पातालभोगिनरकं वारि चैषां च संगतं ॥ ॥ वारिवर्गः ॥ इत्यमरसिंहकृ

ख्रु॰ तो नामलिंगानुसासने स्वरादिकाण्डः प्रथम साङ्ग एव समर्थितः ॥१॥ ॥भुमवर्ग ॥ ॥ पृथ्वी
२१ पुरक्ष्माभृद्वनौषधिभिर्मृगादिभिः ॥ नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिता ॥१॥ भुर्भूमिर
चलानन्तारसाविश्वम्भरास्थिरा ॥ धरा धरीत्री धरणिक्षोणी ज्याकाश्यपीक्षितिः ॥२॥ सर्वं
सहा वसुमती वसुधोर्वी वसुन्धरा ॥ गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥३॥ मृत्
तिका प्रशस्तातु मृत्स्ना मृत्सा च मृत्तिका ॥ उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥४॥ ऊष
वानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली ॥ समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥५॥ त्री
ष्वथो जगती लोकः विष्टपं भुवनं जगत् ॥ लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः ॥ देशः
प्राग्दक्षिणप्राच्यः । उदीच्या पश्चिमोत्तरः ॥ प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥७॥ आर्य्या
र्य्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ॥८॥ निवृज्जनपदो देशविषयौ तूपवर्तनम् ॥ २१

त्रिष्वागोष्ठान्नडप्रायेन्नड्वान्नड्वलइत्यपि१॥कुमुद्वान्कुमुदप्राये१वेतस्वान्बहुवेतसे॥९॥शाद्वलःशा
दहरितेऽ१सजंम्बालेतुपंङ्किलः१॥जलप्रायमनूपंस्यात्पुंसिकच्छस्तथाविधः३॥१०॥स्त्रीशर्क्कराशर्क्करि
लःशार्क्करःशर्क्करावति॥देशएवादिमा४वेवमुन्नेयाःसिकतावति॥११॥देशोनद्यम्बुवृष्ट्यम्बुसंप
न्नव्रीहिपालिकः॥स्यान्नदीमातृकश्च१यथाक्रमंसुराज्ञिदेशेराजन्वान्२॥१२॥स्यात्ततोन्यत्रराजवा
न्१गोष्ठंगोस्थानकं२॥नन्तुगोष्ठीनंभूतपूर्वकं१पर्य्यन्तभूःपरिसरः२॥१३॥सेतुरालौस्त्रियांपुमा
न्२वामलूरश्चनाकुश्चवल्मीकंपुन्नपुंसकं२॥अयनंवर्त्ममार्ग्गाध्वपंन्थानःपदवीसृतिः॥सर
णिःपद्धतिःपद्यावर्त्तन्येकपदीतिच॥१४॥अतिपंथाःसुपंथाश्चसत्पथश्चार्चितेऽध्वनि३॥व्यध्वोदु
रध्वोविपथःकदध्वाकापथःसमाः५॥१५॥अपंन्थास्त्वपथंतुल्येशृंङ्गाटकचतुष्पथे२॥प्रांत
रंदूरशून्योऽध्वाकांन्तारंवर्त्मदुर्गमं२॥१६॥गव्यूतिःस्त्रीक्रोशयुगंनल्वःकिष्कुचतुःशतं१॥घंण्टाप

अ॰ थः संसरणं२ तत्पुरस्योपनिष्करं१॥ १७॥ द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी॥ दिवःपृथिव्यौ
२२ संज्ञोयं परुमास्यात्ल्लववल्मीकरं२॥१८॥ भूमिवर्ग ४॥ पूः स्त्री पुरी नगर्य्यौ वा पत्तनं पुटभेदनं॥ स्था
नीयं निगमो७ न्यत्तु यन्मूलनगरात्पुरं॥१९॥ तच्छाखा नगरं वेशो वेश्याजनसमाश्रयः१॥ स्यात्सा
केतमयोध्यायां विदेहा मिथिला पुरिः२॥२०॥ महोदया कान्यकु[illegible]आ कान्यकुब्जं महोदयं४ का
शी वाराणसी चैव२ विशाला चोज्जयिन्यपि२॥२१॥ प्राग्ज्योतिषं कामरूपं२ द्वारिका द्वारवत्यपि२॥ स्त्र
पणस्तु निषद्यायां विपणिः पण्यवीथिका२॥२२॥ रथ्या प्रतोली विशिखा३ स्याच्चयो वप्रमस्त्रियां२॥
प्राकारो वरणः सालः३ प्राचीरं प्रांततो वृतिः१॥२३॥ भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसं१॥
गृहं गेहोदवसितं वेश्म सद्म निकेतनं॥ २४॥ निशांतवस्त्यसदनं भवनागारमंदिरं॥ गृहाः पुंसि च राम
भूम्न्येव निकाय्यनिलयालयाः॥२५॥ वासः कुटो द्वयोः शाला सभा२ संजवनं त्विदं॥ चतुःशालं २२

मुनीनांतुपर्णशालोटजोऽस्त्रियां२॥२६॥चैत्यमायतनंतुल्येवाजिशालातुमंदुरा२॥मरिष्टंसू
तिकागृहं२वातायनंगवाक्षःस्यात्२॥२७॥मंडपोऽस्त्रीजनाश्रयः२हर्म्यादिधनिनांवासः१॥
प्रासादोदेवभूभुजां।सौधोऽस्त्रीराजसदनं२॥२८॥उपकार्योपकारिकास्वस्तिकसर्वतोभद्रो
नंद्यावर्तादयोपिच॥विच्छंदकप्रभेदाहिभवंतीश्वरसद्मनां॥२९॥स्त्र्यागारंभूभुजामंतःपुरं
स्यादवरोधनं॥शुद्धांतश्चावरोधश्चस्यादट्टःक्षौममस्त्रियां॥३०॥प्रघाणप्रघणालिंदावहिर्द्वा
रप्रकोष्ठके॥गृहावग्रहणीदेहल्यंगणंचत्वराजिरे॥३१॥अधस्ताद्दारुणिशिलानासादारू
परिस्थितं॥प्रच्छन्नमंतर्द्वारंस्यात्पक्षद्वारंतुपक्षकं॥३२॥वलीकनीध्रेपटलप्रांतेऽथपटलं
छदिः॥गोपानसीतुवलभीछादनवक्रदारुणि॥३३॥कपोतपालिकायांतुविटंकंपुन्नपुंस
कं॥स्त्रीद्वार्द्वारंप्रतीहारःस्याद्वितर्दिस्तुवेदिका॥३४॥तोरणोऽस्त्रीवहिर्द्वारंपुरद्वारंतुगोपुरं॥

अ॰ कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥३५॥ कपाटमररं तुल्ये तद्विष्कंभोर्ग्गलं न ना ॥
२३ आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहिणी ॥३६॥ सम्मार्ज्जनी शोधनी स्यात्संकरोव
करस्तथा क्षिप्ते मुखं निःसरणं सन्निवेशो निकर्षणं ॥३७॥ समौ संवसथग्रामौ वेश्मभूर्वास्तु
रस्त्रियां ॥ ग्रामान्त उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ॥३८॥ घोष आभीरपल्ली स्यात्पक्कणः शव
रालयः ॥ पुरवर्ग्गः ॥ महीध्रे शिखरिक्ष्माभृदहार्य्यधरपर्वताः ॥३९॥ अद्रिगोत्रगिरिग्रावाचलशै
लशिलोच्चयाः ॥ लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ ॥४०॥ अस्तस्तु चरमः क्ष्माभृदुद
यः पूर्वपर्वतः ॥ हिमवान्निषधो विंध्यो माल्यवान् पारियात्रकः ॥४१॥ गंधमादनमन्ये च
हेमकूटादयो नगाः ॥ पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ॥४२॥ कूटोऽस्त्री शिखरं शृङ्गं राम
प्रपातस्त्वतटो भृगुः ॥ कटकोऽस्त्री नितंबोद्रेः स्नुः प्रस्थः सानुरस्त्रियां ॥४३॥ उत्सः प्रस्रवणं वा २३

रिप्रवाहोनिर्झरोझरः॥ दरीतुकन्दरोवास्त्रीदेवखातबिलेगुहागह्वरं॥४४॥ गण्डशैलास्तुच्युताःस्थू
लोपलागिरेः॥ खनिःस्त्रियामाकरःस्यात्पादाःप्रत्यन्तपर्वताः॥४५॥ उपत्यकाद्रेरासन्नाभूमिरू
र्ध्वमधित्यका॥ धातुर्मनःशिलाद्यद्रेर्गैरिकंतुविशेषतः॥४६॥ निकुंजकुंजौवाक्लीबेलतादिपि
हितोदरे॥ शैलवर्गः॥४॥ अटव्यरण्यंविपिनंगहनंकाननंवनं॥४७॥ महारण्यमरण्यानीगृहा
रामास्तुनिष्कुटाः॥ आरामःस्यादुपवनंकृत्रिमंवनमेवयत्॥४८॥ अमात्यगणिकागेहोपव
नेवृक्षवाटिका॥ पुमानाक्रीडउद्यानंराज्ञःसाधारणंवनं॥४९॥ स्यादेतदेवप्रमदवनमन्तःपुरोचि
तं॥ वीथ्यालिरावलिःपंक्तिःश्रेणीलेखास्तुराजयः॥५०॥ वन्यावनसमूहेस्यादंकुरोभिनवोद्भिदि॥
वृक्षोमहीरुहःशाखीविटपीपादपस्तरुः॥५१॥ अनोकहःकुटःसालःपलाशीद्रुद्रुमागमाः॥ वानस्प
त्यःफलैःपुष्पात्तैरपुष्पाद्वनस्पतिः॥५२॥ ओषध्यःफलपाकान्ताःस्यादवंध्यःफलेग्रहिः॥ वन्ध्योऽफ
लोऽवकेशीचफलवान्फलिनःफली॥५३॥ प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः॥ फु

अ॰ फुल्लश्चैते विकसिते स्युरवंध्यादयस्त्रिषु ॥५४॥ स्थाणुर्वा ना ध्रुवः शंकुः ह्रस्वशाखाशिफः क्षुपः ॥ अप्र
२४ काण्डे स्तंबगुल्मौ वल्ली तु व्रततिर्लता ॥५५॥ लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ॥ नगाद्या
रोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ॥५६॥ अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥ स
मे शाखालते स्कंधशाखाशाले शिफाजटे ॥५७॥ शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता ॥ शि
रोऽग्रं शिखरं वा ना मूलं बुध्नोंऽह्रिनामकः ॥५८॥ सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियां ॥ का
ष्ठं दार्विंधनं त्वेध इध्ममेधः समित्स्त्रियां ॥५९॥ निष्कुहः कोटरं वा ना वल्लरिर्मंजरिः स्त्रियौ ॥ पत्रं पला
शं छदनं दलं पर्णं छदः पुमान् ॥६०॥ पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियां ॥ वृक्षादीनां फलं स
स्यं वृन्तं प्रसवबंधनं ॥६१॥ आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु ॥ क्षारको जालकं क्लीबे कलि
का कोरकः पुमान् ॥६२॥ स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियां ॥ स्त्रियः सुमनसः पुष्पं प्रसू राम
तं कुसुमं समं ॥६३॥ मकरन्दः पुष्परसः परागः सुमनारजः ॥ द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियां २४

नष्टंमनिंगा

अश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ बार्हतं च फले जंब्वा जम्बूः स्त्री जंम्बु जाम्बवं ॥६५॥ पुष्पे जातीप्रभृ
तयः स्वलिङ्गा व्रीहयः फले ॥ विदार्य्याद्यास्तु मूलेपि पुष्पे क्लीबेपि पाटला ॥६६॥ बोधिद्रुमश्चलदलः पि
प्पलः कुञ्जराशनः ॥ अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ॥६७॥ तस्मिन् दधिफलः पुष्पफलद
न्तशठावपि ॥ उदुम्बरो जंतुफलो यज्ञाङ्गो हेमदुग्धकः ॥६८॥ कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ स
प्तपर्णो विशालत्वक् शारदी विषमच्छदः ॥६९॥ आरग्वधे राजवृक्षशंपाकचतुरङ्गुलाः ॥ आरेवतव्याधि
घातकृतमालसुवर्णकाः ॥७०॥ स्युर्जंबीरे दन्तशठजंभजंम्भीरजंम्भलाः ॥ वरुणो वरणः सेतुस्तिक्तशाकः कु
मारकः ॥७१॥ पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥७२॥ तिनि
शे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ॥७३॥ आम्रातके मधूके तु गु
डपुष्पमधुद्रुमौ ॥ वानप्रस्थमधुष्ठीलौ गिरिजेऽत्र मधूलकः ॥७४॥ पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरि
संभवे ॥ अक्षोटकर्परालौ द्वावङ्कोठे तु निकोचकः ॥७५॥ पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे ॥ रथ

स्र० भूपुष्पविदुलशीतवानीरवंजुलाः॥७६॥ द्वौपरिव्याधविदुलौनादेयीचाम्बुवेतसे॥ शोभाञ्जनेशिग्रुतीक्ष्ण
२५ गंधकाक्षिवमोचकाः॥७७॥ रक्तोसौमधुशिग्रुःस्यादरिष्ठःफेनिलःसमौ॥ विल्वेशाण्डिल्यसैलूखौ
मालूरश्रीफलावपि॥७८॥ प्लक्षोजटीपर्कटीस्यान्न्यग्रोधोवहुपाद्वटः॥ गालवःसावरोलोध्रस्तिरीटस्ति
ल्वमार्ज्जनौ॥७९॥ आम्रश्चूतोरसालोसौसहकारोतिसौरभः॥ कुंभोलूखलकंक्लीबेकौशिकोगुग्गुलुः
पुरः॥८०॥ सेलुश्लेष्मातकःशीतउद्दालोवहुवारकः॥ राजादनंपियालःस्यात्सन्नकद्रुर्द्धनुःपटः॥८१॥
गंभारिसर्वतोभद्राकाश्मीरीमधुपर्णिका॥ श्रीपर्णीभद्रपर्णीचकाश्मर्य्यश्चाप्यथद्वयोः॥८२॥
पट्खर्वदरीफल कर्कंधुर्वदरीकोलिःकोलंकुवलफेनिले॥ सौवीरंवदरंसप्तलप्रथस्यात्स्वादुकंटकः॥८३॥ विकंकत
स्रुवावृक्षोग्रंथिलोव्याघ्रपादपि॥ ऐरावतोनागरङ्गोनादेयीभूमिजंबुका॥८४॥ तिंदुकःस्फूर्ज्ज
कःकालस्कंधश्चशितिसारके॥ काकेंदुःकुलकःकाकपीलुकःकाकतिन्दुके॥८५॥ गोलीढोझाट राम०
लोघंटापाटलिर्मोक्षमुष्ककौ॥ तिलकःक्षुरकःश्रीमान्समौपिचुलझाबुकौ॥८६॥ श्रीपर्णिकाकु २५

मुस्किकाकुंभीकैटर्य्यकट्फलौ ॥ क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ॥ ४७ ॥ तूदस्तु यूपः क्र
मुकोब्रह्मण्योब्रह्मदारु च ॥ तूलंच नीपप्रियककदंबास्तु हलिप्रियो ॥ ४८ ॥ वीरवृक्षोरुष्करोग्निमुखी
भल्लातकी त्रिषु ॥ गर्द्दभांडे कंदरालकपीतनसुपार्श्वकाः ॥ ४९ ॥ प्लक्षश्च तिंतिडी चिंचाम्लिकाऽथोपी
तसारके ॥ सर्ज्जकासनबंधूकपुष्पप्रियकजीवकाः ॥ ५० ॥ सालेतु सर्ज्जकार्श्याश्वकर्णकाः सस्यसं
वरः ॥ नदीसर्ज्जोवीरतरुरिंद्रद्रुः ककुभोर्ज्जुनः ॥ ५१ ॥ राजादनं फलाध्यक्षः क्षीरिकायामथ द्वयोः
॥ इंगुदी तापसतरुर्भूर्ज्जे चर्म्मिमृदुत्वचौ ॥ ५२ ॥ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥ पिच्छा तु
शाल्मलीवेष्टो रोचनः कूटशाल्मलिः ॥ ५३ ॥ चिरिबिल्वो नक्तमालः करजश्च करंजके ॥ प्रकीर्य्यः पूतिक
रजः पूतिकः कलिकारकः ॥ ५४ ॥ करंजभेदाः षड्ग्रंथो मर्कट्यंगारवल्लरी ॥ रोही रोहितकः प्लीहशत्रुर्दाडि
मपुष्पकः ॥ ५५ ॥ गायत्री बालतनयः खदिरो दंतधावनः ॥ अरिमेदो विट्खदिरे कदरः खदिरे सिते ५६
सोमवल्कोऽप्यथ व्याघ्रपुच्छगंधर्वहस्तकौ ॥ एरंडउरुबूकश्च रुचकश्चित्रकश्च सः ॥ ५७ ॥ चंचुः पंचांगुलो

ख० मरुवर्द्धमानविडम्बकाः ॥ श्वसनः करहाटकः शल्यश्च मदनो ॥९८॥ शक्रपादपः पारिभद्रकः भद्रदारु द्रु-
२६ किलिमं पीतुदारु च दारु च ॥ पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ॥९९॥ पाटलिः पाटला मोघा का-
चस्थाली फलेरुहा ॥ कृष्णवृन्ता कुबेराक्षी श्यामा तु महिलाह्वया ॥१००॥ लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलि-
नी फली ॥ विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ॥१०१॥ मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुकाः ॥ श्यो-
नाकः शुकनासर्क्षदीर्घवृन्तकुटन्नटाः ॥१०२॥ शोणकश्चारलौ तिष्यफला त्वामलकी त्रिषु ॥ अमृता च वयः-
स्था च त्रिलिङ्गस्तु विभीतकः ॥१०३॥ नाक्षस्तुषः कर्षफलो भूतवासः कलिद्रुमः ॥ अभया त्वव्यथा पथ्या वयः-
स्था पूतनामृता ॥१०४॥ हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥ पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमो-
॥१०५॥
त्पलः कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः ॥ पनसः कण्टकिफलो निचुलोऽम्बुजइज्जलः ॥१०६॥ काको-
दुम्बरिका फल्गुर्मलपूर्जघनेफला ॥ अरिष्टः सर्वतोभद्रहिङ्गुनिर्य्यासमालकाः ॥१०७॥ पिचुमर्दश्च राम
निम्बोऽथ पिच्छिला गुरुशिंशपा ॥ कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः ॥१०८॥ भण्डिलोऽप्यथ चा- २६

पयस्यपकोहेमपुष्पकः ॥ एतस्य कलिका गन्धफली स्यादथ केशरः ॥१०९॥ वकुलो वंञ्जुलो ऽशोके समौ
करकदाडिमौ ॥ चाम्पेयः केशरो नागकेशरः काञ्चनाह्वयः ॥११०॥ जया जयंन्ती तर्क्कारी नादेयी वैजयंन्ति
का ॥ श्रीपर्णमग्निमंन्थः स्यात्कणिका गणिकारिका ॥१११॥ जयो ऽथ कुटजः शक्रो वत्सको गिरिमल्लिका ॥
एतस्यैव कलिंङ्गेन्द्रयवभद्रयवं फले ॥११२॥ कृष्णपाकफलाविग्नसुखेणाः करमर्दके ॥ कालस्कंधस्तमा
लः स्यात्तापिच्छो ऽप्यथ सिंन्दुकः ॥११३॥ सिंन्दुवारेन्द्रसुरसो निर्गुण्डीन्द्राणिकेत्यपि ॥ वेणी गरा गरी देवताडो जी
मूत इत्यपि ॥११४॥ श्रीहस्तिनी तु भुरुण्डी तृणशून्यं तु मल्लिका ॥ भूपदी शीतभीरुश्च सैवास्फोता व
नोद्भवा ॥११५॥ शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥ सितासौ श्वेतसुरसा भूतकेश्यथ माग
धी ॥११६॥ गणिका यूथिकांम्वष्ठा सा पीता हेमपुष्पिका ॥ अतिमुक्तः पुंण्ड्रकः स्याद्वासंन्ती माधवीलता
॥११७॥ सुमना मालती जातिः सप्तला नवमालिका ॥ माघ्यं कुंन्दं रक्तकस्तु वंधुको वंन्धुजीवकः ॥११८॥ स

अ॰ हीकुमारितरणिरम्लानस्तुमहासहा॥ तत्रशोणेकुरुवकस्तत्रपीतेकुरंटकः॥११९॥ नीलाझिंटीद्वयोर्वा
२१ णादासीचार्त्तगलश्चसा॥ सैरेयिकस्तुझिंटीस्यात्तस्मिन्कुरुवकोऽरुणे॥१२०॥ पीताकुरंटकोझिंटीत
स्मिन्सहचरीद्वयोः॥ उंड्रपुष्पंजपापुष्पंवज्रपुष्पंतिलस्ययत्॥१२१॥ प्रतिहासःशतप्रासचंडातहयमा
रकाः॥ करवीरेकरीरेतुक्रकरग्रंथिलावुभौ॥१२२॥ उन्मत्तःकितवोधूर्तोधत्तूरःकनकाह्वयः॥ मातुलोमद
नश्चास्यफलेमातुलपुत्रकः॥१२३॥ फलपूरोवीजपूरोरुचकोमातुलुङ्गके॥ समीरणोमरुवकःप्रस्थपुष्पः
फणिजकः॥१२४॥ जम्बीरोप्यथपर्णासेकठिंजरकुठेरकौ॥ सितेर्जकोत्रपाठीतुचित्रकोवह्निसंज्ञ
कः॥१२५॥ अर्काह्ववसुकास्फोतगणरूपविकीरणाः॥ मन्दारश्चार्कपर्णोत्रशुक्लेऽलर्कप्रतापसौ॥१२६॥
शिवमल्लीपाशुपतएकाष्ठीलोवुकोवसुः॥ वन्दावृक्षादनीवृक्षरुहाजीवन्तिकेत्यपि॥१२७॥ वत्सादनी रामः
छिन्नरुहागुडूचीतंत्रिकाऽमृता॥ जीवन्तिकासोमवल्लीविशल्यामधुपर्ण्यपि॥१२८॥ मूर्वादेवीमधु २१

रसामोरटा तेजनीश्रवा॥ मधूलिका धनुःश्रेणी गोकर्णी पीलुपर्ण्यपि १०॥ पाठाम्बष्ठा विद्ध
कर्णी स्थापनी श्रेयसी रसा॥ एकाष्ठीला पापचेली प्राचीना वनतिक्तिका १०॥ कटुः कटंभ
रा शोकरोहिणी कटुरोहिणी॥ मत्स्यपीता कृष्णभेदि चक्राङ्गी शकुलादनी १०॥ आत्मगुप्ता जला
व्यंडा कंडुरा प्रावृषायणी॥ ऋष्यप्रोक्ता शूकशिंबी कपिकच्छुश्च मर्कटी॥ चित्रोपचित्रा न्य
ग्रोधी द्रवंन्ती संबरी वृषा॥ प्रत्यक श्रेणी सुतश्रेणी रंडा मूषिकपर्ण्यपि १०॥ अपामार्गः शै
खरिको धामार्गव मयूरकौ॥ प्रत्यकपर्णी केशपर्णी किणिहि खरमंजरी १०॥ हंजिका ब्राह्म
णी पद्मा भार्गी ब्राह्मणयष्ठिका॥ अङ्गारवल्ली बालेयशाक वर्वर वर्द्धकाः १०॥ मंजिष्ठा वि
कसा जिंङ्गी समंङ्गा कालमेषिका॥ मंडुकपर्णी भंडीरी भंडी योजनवल्ल्यपि २॥ यासो य
वासो दुःस्पर्शो धन्वयासः कुनाशकः॥ रोदनी कच्छुरा नंता समुद्रांन्ता दुरालभाः १०॥ पृश्निप

ग्व्र र्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिपर्णिका॥ क्रोष्टुविन्ना सिंहपुच्छी कलसि र्धावनी गुहा॥ निदि
२८ ग्धीका स्पृशी व्याघ्री बृहती कंटकारिका॥ प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रीकेत्यपि॥ नी
ली काला क्लीतकिका ग्रामीणा मधुपर्णीका॥ रंजनी श्रीफली तुस्था द्रोणी दोला च नीलिका॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका॥ कालमेषी कृष्णफला वाकुची पूतिपल्यपि॥ कृ
ष्णोपकुल्या वैदेही मागधी चपला कणा (पिप्पली)॥ उषणा पिप्पली सौंडी कोला ऽथ करिपिप्पली॥ क
पिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान्॥ चव्यं तु चविकार काकचिंचा गुंजे तु कृष्णला॥ प
लंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकंटकः॥ गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि॥
विश्वा विषा प्रतिविषा ऽतिविषोपविषारुणा॥ शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका॥ समः
समेश॥ शतमूली बहुसुता भीरुरिन्दीवरी वरी॥ ऋष्यप्रोक्ता भीरुपत्री नारायण्यः शता २८

वरी॥ अथ हेतुः॰ रथ पीतद्रु कालेयक हरिद्रवः॥ दार्वी पचंपचा दारुहरिद्रा पर्ज्जनीत्यपि॥ वचो
ग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका॥ शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वासका॥ वृषोऽटरू
षः सिंहास्यो वासको वाजिदंतकः॥ आस्फोता गिरिकर्णी स्याद्विष्णुक्रान्ताऽपराजिता॥ इक्षु
गन्धा तु काण्डेक्षुः कोकिलाक्षेक्षुरक्षुराः॥ शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः॥ मिश्रे
योऽप्यथ सीहुण्डो वज्रः स्नुक्स्नुही गुडा॥ समन्तदुग्धाथो वेल्लममोघा चित्रतण्डुला॥ तण्डुलश्च
कृमिघ्नश्च विडङ्गं पुन्नपुंसकं॥ बला वाट्यालका घंटारवा तु शणपुष्पिका॥ मृद्वीका
गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च॥ सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत॥ त्रिभंडी
रोचनी श्यामापालिन्द्यौ तु सुषेणिका॥ काला मसूरविदलार्द्धचन्द्रा कालमेषिका॥ मधुकं
क्लीतकं यष्टिमधुकं मधुयष्टिका॥ विदारी क्षीरशुक्लेक्षुगंधा क्रोष्ट्री च या सिता॥ अन्या

क्षीरविदारी स्यान्महाश्वेतार्क्षगन्धिका ३॥ लाङ्गली शारदी तोयपिप्पली शकुलादनी ४॥ खराश्वा

कारवीदीप्यो मयूरो लोचमस्तकः ५॥ गोपी श्यामा सारिवा स्यादनन्तोत्पलसारिवा ५॥ योग्यमृद्धिः
सिद्धिलक्ष्म्यौ ४ वृद्धेरप्याह्वया इमे ४॥ कदली वारणवुषा रंभा मोचांशुमत्फला ॥ काष्ठीला ६ मुद्ग
पर्णी तु काकमुद्गा सहेत्यपि ३॥ वार्त्ताकी हिङ्गुली सिंही भण्टाकी दुःप्रधर्षिणी ५॥ नाकुली सुर
सा रास्ना सुगन्धा गन्धनाकुली ॥ नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ९॥ विदारिगन्धांशु
मती सालपर्णी स्थिरा ध्रुवा ५॥ तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ४॥ भारद्वाजी तु सा वन्या
शृङ्गी तु ऋषभो वृषः ३॥ गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ५॥ धामार्गवो घोषकः स्या २
न्महाजाली स पीतकः १॥ ज्योत्स्नी पटोलिका जाली ३ नादेयी भूमिजम्बुका २॥ स्याल्लाङ्गलिक्यग्नि
शिखा २ काकनासिका २॥ गोधापदी तु सुवहा २ मुसली तालमूलिका २॥ अजशृङ्गी विषाणी

कांगीका

स्यादृद्धीजिह्वादार्वि के समे ॥१॥ ताम्बुलवल्लीतांम्बुली नागवल्ल्यऽऽप्यथद्विजा ॥ हरेणूरेणुकाकौं
न्तीकपिलाभस्मगन्धिनी६ ॥ एलवालुकमैलेयंसुगन्धिहरिवालुकं ॥ वालुकंचाथपा
लङ्क्यामुकुन्दुःकुन्दुरु४ ॥ वालंह्रीवेरवर्हिष्ठोदीच्यंकेशाम्बुनामच६ ॥ कालानुसार्य्यवृद्धाश्म
पुष्पशीतशिवानितु ॥ शैलेयंपतालपर्णीतुदैत्यागन्धकुटिमुरा ॥ गन्धिनीगजभक्ष्या
तुसुवहासुरभीरसा ॥ महेरणाकुन्दुरुकीशल्लकीह्लादिनीतिच७ ॥ अग्निज्वालासुभि
क्षेतुधातकीधातुपुष्पिका८ ॥ पृथ्वीकाचन्द्रवालैलानिष्कुटिर्बहुलाऽथसा ॥ सूक्ष्मोपकुं
ञ्चिकातुत्थाकोरङ्गीत्रिपुटात्रुटिः९ ॥ व्याधिःकुष्ठंपारिभाव्यंव्याप्यंपाकलमुत्पलं१० ॥
शंखिनीचोरपुष्पीस्यात्केशिन्यऽथवितुन्नकः ॥ झटामलाझटातालीशिवातामलकीति
च ॥ प्रपौण्डरिकंपौण्डर्य्यमथतुन्नःकुवेरकः ॥ तुणीकच्छःकान्तलकोनन्दीवृक्षोऽथराक्ष

अम॰ सी ॥ चंराडाधनहरिक्षेमदुःपुत्रगराहासकाद्६ ॥ व्यालायुधंव्याघ्रनखंकरजंचक्रकारकं ७ ॥
३० सुषीराविद्रुमलताकपोतांघ्रिर्नटीनलीप ॥ धमन्यंजनकेशीचहनुर्हट्टविलासिनी ८ ॥ भु
क्तिशङ्खःखुरःकोलदलंनखमथाढकी ॥ काक्षीमृत्स्नातुवरिकामृत्तालकसुराष्ट्रजे ६ ॥
कुटन्नटंदाशपुरंवानेयंपरिपेलवं ॥ प्लवगोपुरगोनर्दकैवर्त्तीमुस्तकानिच ७ ॥ ग्रन्थि
पर्णंशुकंबर्हंपुष्पंस्थौणेयकुक्कुरप ॥ मरुन्मालातुपिशुनास्पृक्कादेवीलतालघुः ॥ समु
द्रान्तावधूकाटिवर्षालंकोपिकेत्यपि १० ॥ तपस्विनीजटामांसीजटिलालोमशामिसी ६ ॥ म
रुन्मांसा ॥ त्वक्पत्रमुत्कटंभृंङ्गंत्वचंचोचंवराङ्गकं १ ॥ कर्चूरकोद्राविडकःकाल्पकेःवेधमु
ख्यकः ॥ तुषध्योजातिमात्रेस्यूरजातौसर्वमौषधं ॥ शाकख्यंपत्रपुष्पादितंडुलीयोऽल्पमारि राम
षः २ ॥ विशल्याग्निशिखानंतापफलिनीशक्रपुष्प्यपिय ॥ स्यादृक्षगंन्धाछगलांत्र्यावेगीवृद्ध ३०

दारकः॥ मुंडीपब्राह्मीतुमत्स्याक्षीवयःस्थासोमवल्लरी४॥ पटुपर्णीहैमवतीस्वर्णक्षीरीहि
मावती४॥ हयपुच्छीतुकांबोजीमाषपर्णीमहासहा४॥ तुंडिकेरिरक्तफलाबिंबिका
पीलुपर्ण्यपि४॥ बर्बराकबरीतुंगीखरपुष्पाजगंधिका५॥ एलापर्णीतुसुवहारास्नायु
क्तरसाचसा४॥ चंडुरीचुक्रिकादंतशठाम्लवष्ठाम्ललोणिका५॥ सहस्रवेधीचुक्रोऽम्ल
वेतसःशतवेध्यपि४॥ नमस्कारीगंडुकारिसमंगाखदिरीत्यपि४॥ जीवंतीजीवनीजी
वाजीवनीयामधुस्रवाप॥ कूर्चशीर्षोमधुरकःशृंगह्रस्वांगजीवकाः५॥ किराततिक्तो
भूनिंबोनार्यतिक्तोऽथसप्तला॥ विमलाशातलाभूरिफेनाचर्मकषेत्यपि५॥ वायस
सोलीस्वादुरसावयःस्थाऽथमकूलकः॥ निकुंभोदंतिकाप्रत्यक्श्रेण्युदुंबरपर्ण्यपि
५॥ अथाजमोदाउग्रगंधाब्रह्मदर्भायवानिका४॥ मूलेपुष्करकाश्मीरपद्मपत्राणिपौ

ष्करे ३ ॥ अव्यथातिचरापद्माचारटिपद्मचारिणीप ॥ कंपिल्यःकर्कशश्चन्द्रोरक्तांगोरे
 चनीत्यपिप ॥ प्रपुन्नाडस्त्वेडगजोदद्रुघ्नश्चक्रमर्द्दकः ॥ पद्माटउरणाख्यश्चपलांडु
स्तुसुकंदकः २ ॥ लतार्कदुद्रुमौतत्रहरितेऽथमहौषधं ॥ लशुनंगृंजनारिष्टमहाकंदर
सोनकाः ३ ॥ पुनर्नवातुशोथघ्नीवितुन्नंसुनिषण्णकं २ ॥ स्याद्वातकःशीतलोऽपराजि
तासनपर्ण्यपि ४ ॥ पारावतांघ्रिःकटभीपिण्याज्योतिष्मतीलताप ॥ वार्षिकंत्रायमाणास्या
त्त्रायंत्रिबलभद्रिका ४ ॥ विष्वक्सेनप्रियागृष्टिर्वाराहीबदरेत्यपि ४ ॥ मार्कवोभृङ्गराजःस्या
त्काकमाचीतुवायसी २ ॥ शतपुष्पासितच्छत्राऽतिच्छत्रामधुरामिसिः ॥ अवाक्पुष्पी
कारवीचसरणातुप्रसारिणी ॥ तस्यांकटंभराराजबलाभद्रबलेतिचप ॥ जनीजतूकाज
ननीजतुकृच्चक्रवर्त्तिनी ॥ संस्पर्शाऽथशटीगन्धमूलीषड्ग्रन्थिकेत्यपि ॥ कर्चूरोपिप

लाशोपिपकारस्त्रिवृन्तः कठिल्लकः॥ सुषवी चाऽथ कुलकं पटोलस्तिक्तकः पटुः ४॥ कूष्माण्डकस्तु
तर्क्कारुरुर्वारुः कर्क्कटी स्त्रियौ २॥ इक्ष्वाकुः कटुतुम्बी स्यात् २ तुम्ब्यलाबुरुभे सम २॥ चित्रा गवाक्षी
गोडुम्बा २ विशाला त्विन्द्रवारुणी २॥ अर्शोघ्नः शूरणः कन्दो ३ गण्डीरस्तु समष्ठिला २॥ कलम्बु
र्य्योदकी स्त्री तु मूलकं हिलमोचिका २॥ वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका॥ सहस्रवीर्य्या
भार्गव्यौ रुहाऽनन्ताऽथ सा सिता॥ गोलोमी शतवीर्य्या च गण्डाली शकुलाक्षकः ४॥ कुरुविन्दो
मेघनामा मुस्ता मुस्तकमस्त्रियां ४॥ स्याद्भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ५॥ वंशे त्वक्सारक
व र्म्मारत्वचिसारतृणध्वजाः॥ शतपर्वा यवफलो वेणुमस्करतेजनाः १०॥ वेणवः कीचकास्ते स्यु
र्ये स्वनन्त्यनिलोद्धताः १॥ ग्रन्थिर्न्ना पर्व परुषी ३ गुन्द्रस्तेजनकः शरः ३॥ नडस्तु धमनः पोटगलोऽऽ
थो काशमस्त्रियां॥ इक्षुगन्धा पोटगलः ३ पुंसि भूम्नि तु वल्वजाः १॥ रसाल इक्षुस्तद्भेदाः पुण्ड्रकां

अम नारकाद्ययः २॥ स्याद्वीरणंवीरतरंमूलेस्योशीरमस्त्रियां अभयंनलदंसेव्यममृणालंजला
३२ शयं॥ लामज्जकंलघुलयमवदाहेष्टकापथे १०॥ नलादयस्तृणंगर्मुच्छ्यामाकप्रमुखाअपि
अस्त्रीकुशंकुथोदर्भः पवित्रमथ ५ कत्तृणं॥ पौरसौगन्धिकध्यामदेवजग्धकरौहिषं॥ छ
त्रातिच्छत्रपालघ्नौमालातृणकभूस्तृणे ४॥ शष्पंबालतृणं २ घोरप्रातुपूगःक्रमुकोगुवाकः
खपुरोऽस्यतु॥ फलमुद्वेग १ मेतेचहिंतालसहितास्त्रयः॥ खर्ज्जूरःकेतकीतालीखर्ज्जूरीचतृणद्रु
माः॥ ॥वनौषधिवर्ग्गः॥ सिंहोमृगेन्द्रः पञ्चास्योहर्य्यक्षः केशरीहरिः ६॥ शार्द्दूलद्वीपिनौव्याघ्रे
तरक्षुस्तुमृगादनः २॥ कण्ठीरवोगजरिपुः पिङ्गः इभिमृगाशनः ६॥ वराहः शूकरोघृष्टिः कोलः
पोत्रीकिरिष्किटिः॥ दंष्ट्रीघोणीस्तब्धरोमाक्रोडोभूदारइत्यपि ११॥ कपिप्लवङ्गप्लवगशाखामृगव रामः
लीमुखाः॥ मर्कटोवानरः कीशोवनौकाः अथभल्लुके॥ ऋक्षाच्छभल्लभालूकाः ४ गण्डकेखड्ग ३२

खड्गिनो ३॥ लुलापो महिषो वाहद्विषत्कासरसैरिभाः ५॥ स्त्रियाँ शिवा भूरिमायगोमायु
मृगधूर्तकाः॥ शृगालवंचककोष्टुफेरुफेरवजंबुकाः १०॥ ओतुर्बिडालो मार्ज्जारो वृषदंशक
आखुभुक् ५॥ त्रयो गौधेरगौधारगौधेया गोधिकात्मजे ३॥ श्वावित्तु शल्यस्तल्लोम्नि शलली
शललं शलं ३॥ वातप्रमीर्वातमृगः २ कोकईहामृगो वृकः ३॥ मृगे कुरंङ्ग-वातायु हरिणाजि
नयोनयः ५॥ ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु २॥ कदली कन्दली चीनश्चमूरुप्रिय
१ कावपि॥ समूरुश्चेति हरिणा अमी अजिनयोनयः ६॥ कृष्णसाररुरुन्यङ्कुसंम्बररौहिषाः॥ गोक रङ्कुः
र्णपृषतैणर्स्यरोहिताश्चमरो मृगाः २॥ गंधर्वः शरभो रामः सृमरो गवयः शशाः ६॥ इत्यादयो
मृगेंद्राद्या गवाद्याः पशुजातयः॥ उंदुरुर्मूषिकोप्याखुर्गिरिका बालमूषिका॥ छुछुंदु
री गंधमुखी दीर्घतुण्डी दिवान्धका ४॥ सरटः कृकलासस्स्यान्मुसली गृहगोधिका २॥ ल

सिंहाद्यवर्ग तास्त्री तंतुवायोर्णनाभमर्कटकाः समाः ४ ॥ नीलांगुस्तु क्रमिः २ कर्णजलौकाः शतपद्युभे २ ॥ वृश्चि
ख्यम· कः शूककीटः स्यात् २ द्रालिद्रुणौ तु वृश्चिके ३ ॥ पारावतः कलरवः कपोतो ३ ऽथ शशादनः ॥ पत्री
३३ श्येन ३ उलुके तु वायसारातिपेचकौ ३ ॥ व्याघाटः स्याद्भरद्वाजः २ खंजरीटस्तु खंजनः २ ॥ लोह
पृष्ठस्तु कङ्कः स्यात् २ अथ चाषः किकीदिविः २ ॥ कुलिंङ्ग भङ्ग धूम्याटा ३ अथ स्यात् छतपत्रकः ॥
दार्वाघाटो २ ऽथ सारंङ्गस्तोककश्चातकः समाः ३ ॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः
४ ॥ चटकः कलविङ्कः स्यात् २ तस्य स्त्री चटका तयोः ॥ पुमपत्ये चाटकैर २ स्त्र्यपत्ये च टकैव हि ॥
कर्करेटुः करेटुः स्यात् २ कृकणक्रकरौ समौ २ ॥ वनप्रियः परभृतः कोकिलः पिक इत्यपि ४ ॥
काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ॥ ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि १० ॥ रामः अमः
द्रोणकाकस्तु काकोलो २ दात्यूहः कालकंठकः ॥ आतापिचिल्लौ २ दाक्षाय्यगृध्रौ २ कीर ३३ २

त्कोससमौ २॥ क्रुङ् क्रौञ्चोऽथ वकः कङ्कः याऽपुष्कराह्वस्तु सारसः ३॥ कोकश्चक्रश्चक्रवाको रथाङ्गा
ह्वयनामकः ४॥ कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ २॥ हंसास्तु श्वेतगरुतश्चक्रा
ङ्गा मानसौकसः २॥ राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ३॥ मलिनैर्म्मल्लिकाख्यास्ते धार्त
राष्ट्राः सितेतरैः ४॥ शरारिराटिरातिश्च ३ बलाका बिसकण्ठिका २॥ हंसस्य योषिद्वरटा सारस
स्यतु लक्ष्मणा ३॥ जतुकाजिनपत्रास्यात्परोष्णी तैलपायिका ४॥ वर्वणा मक्षिका नीला सरघा
मधुमक्षिका १॥ पतङ्गिका पुत्तिकास्याद्दंशस्तु वनमक्षिका २॥ दंशी तज्जातिरल्पास्याद्गन्धोली
वरटा द्वयोः ३॥ भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ४॥ समौ पतङ्गशलभौ खद्योतो ज्यो
तिरिङ्गणः १॥ मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ॥ द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥
॥ मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ॥ शिखावलः शिखी केकी मेघनादानुलास्यपि ॥

सिंहादिवर्ग केकावाणीमयूरस्यासमौचंद्रकमेचकौ॥१॥शिखाचूडाशिखंडस्तुपिच्छबर्हेनपुंसके॥ खगे
शुभम् विहंगविहगविहंगमविहायसः॥शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः॥पतत्रिपत्रिपतग
३४ पतत्पत्त्ररथांडजाः॥नगौकोवाजिविकिरविविष्किरपतत्रयः॥नीडोद्भवागरुत्मन्तःपित्सन्तोनभ
सङ्गमाः॥२१॥तेषाम्विशेषाहारीतामद्गुःकारंडवःप्लवः॥तित्तिरिःकुक्कुभोलावोजीवंजीवश्चकोरकः॥
कोयष्टिकष्टिट्टिभकोवर्तकोवर्तिकादयः॥२३॥गरुत्पक्षच्छदाःपत्रंपतत्रञ्चतनूरुहं॥स्त्री
पक्षतिःपक्षमूलंचंचुस्त्रोटिरुभेस्त्रियौ॥प्रडीनोड्डीनसंडीनान्येताःखगगतिक्रियाः॥पे
शीकोशोद्विहीनेंडंकुलायोनीडमस्त्रियां॥पोतःपाकोर्भकोडिंभःपृथुकःशावकःशिशुः॥
स्त्रीपुंसौमिथुनंद्वंद्वंयुग्मन्तुयुगलंयुगं॥समूहनिवहव्यूहसन्दोहविसरव्रजाः॥स्तोमौघ राम
निकरव्रातवारसंघातसंचयाः॥समुदायःसमुदयःसमवायश्चयोगणः॥स्त्रियांतुसंहतिर्वृ ३४

न्दन्ति कुरुम्बकूद्रवके २४॥ छन्दभेदाः समैर्वर्गाः १ संहसाथौनुजन्तुभिः २॥ सजातीयैः कुलंयूथन्ति
रश्चांपुन्नपुंसकं १॥ पश्वनौसहासक्ताः पक्षीमृगाश्छेकास्तेगृह्यकाश्चते २॥ ॥ ॥ सिंहादिवर्गः॥
॥ ॥मनुष्यामानुषामर्त्यामनुजामानवानराः ६॥ स्युःपुमांसःपञ्चजनाःपुरुषाःपूरुषानरः॥
स्त्रीयोषिदबलायोषानारीसीमन्तिनीवधूः॥ प्रतीपदर्शिनीवामावनितामहिलातथा १॥ विशेषा
स्त्वङ्गनाभीरुःकामिनीवामलोचना॥ प्रमदाभाविनीकान्तालननावनितम्बिनी॥ सुन्दरीरमणी
रामाकोपनासैवभामिनी ४॥ वरारोहामत्तकासिन्युत्तमावरवर्णिनी ४॥ कृताभिषेकामहिषी १
भोगिन्याद्यान्नृपस्त्रियः॥ पत्नीपाणिगृहीताचद्वितीयासहधर्म्मिणी॥ भार्य्याजायाऽथपुम्भि
दाराः १स्यात्तुकुटुम्बिनी॥ पुरन्ध्रीस्सुचरित्रातुसतीसाध्वीपतिव्रता ४॥ कृतसापत्निकाऽध्यूढाऽ
धिविन्नाऽथस्वयम्वरा॥ पतिम्वराचवर्य्याच ३ कुलस्त्रीकुलपालिका २॥ कन्याकुमारिगौ

नवर्ग
श्रम०
३५

रीतु नग्निका नागतार्तवा १॥ स्यान्मध्यमा दृष्टरजास्तरुणी युवती समे २॥ समाः स्नुषा जनी वध्वश्चि
रंटी तु सुवासिनी १॥ इच्छावती कामुकी स्यात् वृषस्यन्ती तु कामुकी २॥ कान्तार्थिनी तु या याति सं
केतं साभिसारिका १॥ पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी २॥ स्वैरिणी पांशुला च स्यादशि
श्वी शिशुना विना १॥ अवीरा निष्पतिसुता विश्वस्ता विधवे समे २॥ आलिः सखी वयस्याथ
पतिवत्नी सभर्तृका ३॥ वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती ४॥ शूद्री शूद्रस्य भार्या
स्याच्छूद्रा तज्जातिरेव च १॥ आभीरी तु महाशूद्री जातिपुंयोगयोः समा २॥ अर्याणी स्वयमा
र्या स्यात् क्षत्रिया क्षत्रियाण्यपि १॥ उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः २॥ आचा
र्याणी तु पुंयोगे स्यादर्यी क्षत्रियी तथा १॥ उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा १॥ राम:
वीरपत्नी वीरभार्या वीरमाता तु वीरसूः २॥ जातापत्या प्रजाता च प्रसूता च प्रसूतिका ४॥ स्त्री ३५

नग्निका कोटवी स्याद्दूती सञ्चारिके समे २ ॥ कात्यायन्यर्द्धवृद्धा या काषायवसनाऽधवा १ ॥ सै
रन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ॥ असिक्नी स्यादवृद्धा या प्रेष्याऽन्तःपुरचारिणी २ ॥ वा
रस्त्री गणिका वेश्या रूपाजीवाऽथ सा जनैः ॥ सत्कृता वारमुख्या स्यात्कुट्टनी शंभली समे २ ॥
विप्रश्निका त्वीक्षणिका दैवज्ञाऽथ रजस्वला ॥ स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ ऋ
तुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्त्तवं ३ ॥ श्रद्धालुर्दोहदवती निष्कला विगतार्त्तवा २ ॥ आप
न्नसत्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ४ ॥ गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ पुन
र्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः १ ॥ स तु द्विजोऽग्रेदिधिषुः सैव यस्य कुटुम्बिनी २ ॥ कामी
नः कन्यकाजातः सुतोऽथ सुभगासुतः ॥ सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ पै
तृष्वस्रेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ॥ सुतो २ मातृष्वसुश्चैवं वैमात्रेयो विमातृजः २ ॥ अथ

न्वर्ग. थवांधकिनेयःस्याद्बन्धुलश्चासतीसुतः॥कौलटेयःकौलटेरोपिभिक्षुकीतुसतीयदि॥तदा
श्र. कौलटिनेयोऽस्याःकौलटेयोपिचात्मजः१॥आत्मजस्तनयःसूनुःसुतःपुत्रःस्त्रियांत्वमी॥आ
३६ ऽहुर्दुहितरंसर्वेपऽपत्यंतोकंतयोस्समे२॥स्वजातेत्वौरसोरस्यौ२तातस्तुजनकःपिता३॥जनयि
त्रीप्रसूर्म्माताजननी४भगीनीस्वसा२॥ननांदातुस्वसापत्युर्न्नप्त्रीपौत्रीसुतात्मजा२॥भार्य्या
स्तुभ्रातृवर्गस्ययातरःस्युःपरस्परं१॥प्रजावतीभ्रातृजाया२मातुलानीतुमातुली२॥पतिप
त्न्योःप्रसूःश्वश्रूःश्वशुरस्तुपितातयोः१॥पितुर्भ्रातापितृव्यःस्यात्मातुर्भ्रातातुमातुलः१॥स्यालाः
स्युर्भ्रातरःपत्न्याः१स्वामिनोदेवृदेवरौ२॥स्वस्रीयोभागिनेयःस्याज्जामातादुहितुःपतिः१॥पिता
महःपितुःपिता१तत्पितात्प्रपितामहः१॥मातुर्म्मातामहाद्येवंसपिण्डास्तुसनाभयः१॥समानो रामः
दर्य्यसोदर्य्यसगर्भ्यसहजाससमाः४॥सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाःसमाः६॥ज्ञातेयम्बन्धु ३६

तातेषां क्रमाद्द्वावसम्मूह्योः १॥ धवः प्रियः पतिर्भर्त्ता ४ जारस्तूपपतिः समौ २॥ अमृते जारजः कु
ण्डो मृते भर्त्तरी गोलकः १॥ भ्रातृव्यो भ्रातृजो २ भ्रातृभगिन्यौ भ्रातरावुभौ १॥ मातापितरौ पितरौ मा
तरपितरौ प्रसूजनयितारौ ४॥ श्वश्रूश्वशुरौ श्वशुरौ २ पुत्रौ पुत्रश्च दुहिता च २॥ दंपती जंपती भार्य्या
पती जायापती च तौ ४॥ गर्भाशयो जरायुः स्यादुल्वञ्च पाकललो ऽस्त्रियां ४॥ सूतिमासो वैजननो २
गर्भभ्रूणाविमौ समौ २॥ तृतीया प्रकृतिः शंढः क्लीवं पण्डो नपुंसके ५॥ शिशुत्वं शैशवं वाल्यं ३
तारुण्यं यौवनं समे २॥ स्यात्स्थाविरं तु वृद्धत्वं २ वृद्धसंघो ऽपि वार्द्धकं २॥ पलितं जरसा शौक्ल्यं केशादौ
विस्रसा जरा २॥ स्यादुत्तानशया डिंभा स्तनपा च स्तनंधयी २॥ बालस्तु स्यान्माणवको वयस्थस्त
रुणो युवा ३॥ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जिरंन्न पि ६॥ वर्षीयान् दशमी ज्यायान् ३ पूर्वजस्त्व
ग्रियो ऽग्रजः ३॥ जघन्यजे स्युः कनिष्ठयवीयो ऽवरजानुजाः ५॥ अमांसो दुर्बलः शातो २ बलवान्मां

न्वर्गः
ष्यु॰
३२

सलाशालः ३॥ तुंदिलस्तुंदिकस्तुंदि बृहत्कुक्षिः पिचिंडिलः ५॥ अवटीटोऽवनाटश्चावभ्रटो
नतनासिके ४॥ केशवः केशिकः केशी ३ वलिनो वलिभः समौ २॥ विकलाङ्गस्त्वपोगंडः २
खर्वो ह्रस्वश्च वामनः ३॥ खरणाः स्यात्खरनसो २ विग्रस्तु गतनासिकः २॥ खुरणाः स्यात्खुरन
सः २ प्रज्ञुः प्रगतजानुकः २॥ ऊर्द्ध्वज्ञुरूर्द्ध्वजानुः स्यात् २ संज्ञुः संहतजानुकः २॥ स्यादेडो वधिरः
२ कुब्जे गडुः २ कुकरे कुणिः २॥ पृश्निरल्पतनौ २ श्रोणः पंगौ २ मुंडस्तु मुण्डिते २॥ वलिरः के
करे २ खोडे खंजस्त्रिषु जरावराः॥ जडुलः कालकः पिप्लु ३ स्तिलकस्तिलकालकः २॥ अनाम
ये स्यादारोग्यं २ चिकित्सा रुक्प्रतिक्रिया २॥ भेषजौषधभैषज्यान्यगदो जायुरित्यपि ५॥ स्त्री
रुग्रुजा चोपतापरोगव्याधिगदामयाः ७॥ क्षयः शोषश्च यक्ष्मा च ३ प्रतिश्यायस्तु पीनसः २॥ राम
स्त्री क्षुत् क्षुतं क्षवः पुंसि ३ कासस्तु क्षवथुः पुमान् २॥ शोफस्तु श्वयथुः शोथः ३ पादस्फोटो वि ३२

वादिकार॥ किलासंसिध्मरकच्छ्वांतुपामपामाविचर्च्चिका४॥ खर्ज्जूः कंडूश्चकंडूया३ विस्फोटः
पिटकस्त्रिषु२॥ व्रणोऽस्त्रियामीर्म्ममरुः क्लीवे३ नाडीव्रणः पुमान१॥ कोठोमण्डलकं२ कुष्ठश्वि
त्रं२ दुर्न्नामकार्शसी२॥ आनाहस्तुविबन्धस्यात२ ग्रहणीरुकप्रवाहिका२॥ प्रच्छर्दिकावमि
श्चस्त्रीपुमांस्तुवमथुः समाः३॥ व्याधिभेदाविद्रधिः स्त्रीज्वरमेहभगन्दराः॥ अश्मरीमूत्रकृच्छ्रं
स्यात्पूर्वेशुक्रावधेस्त्रिषु॥ रोगहार्य्यगदंकारो भिषग्वैद्यौचिकित्सके५॥ वार्त्तोनिरामयः कल्य
३ उल्लाघोनिर्गतोगदात१॥ ग्लानग्लास्नू२ आमयावीविकृतोव्याधितोऽपटुः॥ आतुरोऽभ्यमि
तोऽभ्यान्तः७ समौपामनकच्छुरौ२॥ दद्रुघ्नोदद्रुरोगीस्यात२ अर्शोरोगयुतोऽर्शसः२॥ वातकीवातरो
गीस्यात२ सातिसारोऽतिसारकी२॥ स्युःक्लिन्नाक्षेचुल्लचिल्लपिल्लाः४ क्लिन्नेऽक्ष्णिचाप्यमी४॥ उन्मत्तउ
न्मादवति२ श्लेष्मलः श्लेष्मणः कफी३॥ न्युब्जोभुग्नेरुजा२ वृद्धनाभौतुन्दिलतुन्दिभौ२॥ किलासीसि

न्ववर्गः घ्मलोऽस्त्री ऽन्धो ऽदृक्कूस्मरु छ्लीले मूर्त्तमूर्छितो३ ॥ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च६ ॥ मा
ष्प्रमः युः पित्तं२ कफः श्लेष्मा२ स्त्रियां तु त्वगसृग्धरा२ ॥ पिशितं तरसं मांसं पललं क्रव्यमामिषं६ ॥ उ
३० त्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकं३ ॥ रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितं२ बुक्काग्रमां
सं हृदयं हृत्४ ॥ मेदस्तु वपा वसा३ पश्चाद्ग्रीवाशिरा मन्या१ ॥ नाडी तु धमनिः शिरा३ तिल
कं क्लोम२ मस्तिष्कं गोर्दं२ ॥ किट्टं मलोऽस्त्रियां२ अन्त्रं पुरीतत्२ गुल्मस्तु ॥ प्लीहा पुंस्य२ऽथ वस्नसा
स्नायुः स्त्रियां२ ॥ कालखण्डयकृती तु समे इमे२ सृणिका स्यन्दिनी लाली३ ॥ दूषिका नेत्रयोर्म
लं१ मूत्रं प्रस्रावः२ उच्चारावस्करौ शमलं शकृत् ॥ पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ८ ॥
स्यात्कर्परः कपालोऽस्त्री२ कीकसं कुल्यमस्थि च३ ॥ स्याच्छरीरास्थि कङ्कालः२ पृष्ठास्थि तु कशे रामः
रुका२ ॥ शिरोस्थनि करोटिः स्त्री२ पार्श्वास्थनि तु पर्शुका२ ॥ अङ्गं प्रतीकोऽवयवोऽपघनो४ ३०

य कलेवरं ॥ गात्रंम्वपुः संहननंशरीरंवर्ष्मविग्रहः ॥ कायोदेहः क्लिवपुंस्योः स्त्रियांम्मूर्तिस्त
नुस्तनूः १२ ॥ पादाग्रंप्रपदंपादः पदंघ्रिश्चरणोऽस्त्रियां ४ ॥ तद्ग्रन्थीघुटिकेगुल्फौ २ पुमा
न्पार्ष्णिरधस्तयोः १ ॥ ~~कटोनाश्रोणिफलकं २ कटिः श्रोणिःककुद्मती~~ ३ जङ्घातुप्रसृता २
जानूरुपर्वाष्ठीवदस्त्रियां ३ ॥ सक्थिक्लीबेपुमानूरुस्तत्सन्धिः पुंसिवंक्षणः १ ॥ गुदंत्वपा
नंपायुर्ना ३ वस्तिर्नाभेरधोद्वयोः १ ॥ कटोनाश्रोणिफलकं २ कटिः श्रोणिःककुद्मती ३ ॥ प
श्चान्नितम्बः स्त्रीकट्याः १ क्लीवेतुजघनंपुरः ॥ कूपकौतुनितम्बस्थौद्वयहीनेकुकुन्दरे २ ॥ स्त्रियांस्फि
चौकटिप्रोथौ २ उपस्थोवक्ष्यमाणयोः १ ॥ भगंयोनिर्द्वयोः २ शिश्नोमेढ्रोमेहनशेफसी ४ ॥ मु
ष्कोऽण्डकोषोवृषणः ३ पृष्ठवंशाधरेत्रिकं १ ॥ पिचिंडकुक्षीजठरोदरंतुन्दं ५ स्तनौकुचौ २ ॥ चू
चुकंतुकुचाग्रंस्यात् २ ननाक्रोडंभुजान्तरं ॥ उरोवत्संचवक्षश्च ३ पृष्ठंतुचरमंतनोः १ ॥ स्कंधोभु

न्टवर्गः गशिरों सोऽस्त्री२ सधी तस्यैव जत्रुणी१॥ बाहुमूले उभौ कक्षौ२ पार्श्वमस्त्री तयोरधः१ म
श्रमः ध्यमं चावलग्नं च मध्योऽ३स्त्री द्वौ परौ द्वयोः॥ भुजबाहू प्रवेष्टो दोः४ स्यात्कफोणिस्तु
३९ कूर्परः२॥ अस्योपरि प्रगण्डः स्यात्१ प्रकोष्ठस्तस्य चाप्यधः१॥ मणिबन्धादाकनिष्ठं करस्य
करभो बहिः१॥ पंचशाखः शयः पाणि३स्तर्जनी स्यात्प्रदेशिनी१॥ अङ्गुल्यः करशाखाः
स्युः२ पुंस्यंगुष्ठः१ प्रदेशिनी॥ मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात्४॥ पुनर्भवः क
ररुहो नखोऽस्त्री नखरोऽस्त्रियां४॥ प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अङ्गुष्ठे३॥ सकनिष्ठे
स्याद्वितस्तिर्द्वादशांगुलः१ पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ३॥ द्वौ संहतौ संहततलप्र
तलौ वामदक्षिणौ१॥ पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान्१॥ प्रकोष्ठे विस्तृतकरे हस्तो रामः
१ मुष्ट्या तु बद्धया॥ स रत्निः स्यादरत्निस्तु निःकनिष्ठेन मुष्टिना१॥ व्यामो बाह्वोः सकरयोस्त ३९

तयोस्तिर्य्यगंतरं१॥ ऊर्द्ध्वविस्तृतदोःपाणिनृमानेपौरुषंत्रिषु१॥ कंठोगलो२ऽथग्रीवायांशिरो
धिःकंधरेत्यपि३॥ कंबुग्रीवात्रिरेखासा१ऽवटुर्घाटाकृकाटिका३॥ वक्त्रास्येवदनंतुंडमान
नंलपनंमुखं७॥ क्लीबेघ्राणंगंधवहाघोणानासाचनासिका५॥ ओष्ठाधरौतुरदनच्छदौद
शनवाससी४॥ अधस्ताच्चिबुकं१गंडौकपोलौ२तत्पराहनुः१॥ रदनादशनादंतारदा४स्ता
लुतुकाकुदं२॥ रसज्ञारसनाजिह्वा३प्रांतेओष्ठस्यसृक्कणी१॥ ललाटमलिकंगोधिः३ऊर्द्ध्वेदृग्भ्यां
भ्रुवौस्त्रियां१॥ कूर्चमस्त्रीभ्रुवोर्म्मध्यं१तारकाक्ष्णःकनीनिका१॥ लोचनंनयनंनेत्रमीक्षणंचक्षु
रक्षिणी॥ दृग्दृष्टीचा१०स्रुनेत्रांबुरोदनंचास्रमस्रुच५॥ अपांगौनेत्रयोरंतौ१कटाक्षो१पांगदर्शने॥
कर्णशब्दग्रहौश्रोत्रंश्रुतिःस्त्रीश्रवणंश्रवः६॥ उत्तमांगंशिरःशीर्षंमूर्द्धानामस्तकोऽस्त्रियां५॥ चि
कुरःकुंतलोवालःकचःकेशःशिरोरुहः६॥ तद्वृंदेकैशिकंकैश्यमलकाश्चूर्णकुंतलाः२॥ तेललाटेभ्र

नृवर्गः मरकाः१ काकपक्षिशिखंडकः २॥ कवरी केशवेशोऽथ धम्मिल्लः संयताः कचाः १॥ शिखाचूडाकेश
श्रमः पाशोर व्रतिनस्तु जटा सटाः २॥ वेणिः प्रवेणी २ शीर्षण्यशिरस्यौ विशदे कचे २॥ पाशः पक्षश्च ह
४० स्तश्च कलापार्थाः कचात्परे ३॥ तनूरुहं रोम लोम ३ तद्वृद्धौ श्मश्रु पुंमुखे १॥ आकल्पवेषौ नेपथ्यं
प्रतिकर्म प्रसाधनं ५॥ दशैते त्रिष्वलंकर्ताऽलंकरिष्णुश्च मण्डितः ३॥ प्रसाधितोऽलंकृतश्च भूषितश्च
तश्च परिष्कृतः ४॥ विभ्राड्भ्राजिष्णुरोचिष्णु ३ भूषा तु स्यादलंक्रिया २॥ अलंकारस्त्वाभरणं परिष्कारो
विभूषणं॥ मण्डनं चाथ मुकुटं किरीटं पुन्नपुंसके २॥ चूडामणिः शिरोरत्नं २ तरलो हारम
ध्यगः १॥ बालपाश्या पारितथ्या २ पत्रपाश्या ललाटिका २॥ कर्णिका तालपत्रं स्यात् २ कुण्डलं
कर्णवेष्टनं २॥ ग्रैवेयकं कंठभूषा २ लम्बनं स्याल्ललन्तिका २॥ स्वर्णैः प्रालंबिकाऽथोरःसूत्रि रामः
का मौक्तिकैः कृता १॥ हारो मुक्तावली २ देवच्छंदोऽसौ शतयष्टिकः १॥ हारभेदा यष्टिभेदाद्गुत्सगु ४०

त्सार्द्धगोस्तनाः३॥ अर्द्धहारोमाणवक२ एकावल्येकयष्टिका१॥ सैवनक्षत्रमालास्यात्सप्तविंसति
मौक्तिकैः१॥ आवापकःपारिहार्य्यःकटकंम्बलयोऽस्त्रियां४॥ केयूरमङ्गदंतुल्ये२ अङ्गुलीयक
मूर्म्मिका२॥ साक्षराङ्गुलिमुद्रास्यात्कङ्कणंकरभूषणं१॥ स्त्रीकट्यांमेखलाकाञ्चीसप्तकीरस
नातथा॥ क्लीवेसारसनंचाथपुंस्कट्यांशृङ्खलंत्रिषु१॥ पादाङ्गदन्तुलाकोटिर्म्मञ्जीरोनूपुरोऽ
स्त्रियां२॥ हंसकःपादकटकः२किङ्किणीक्षुद्रघण्टिका२॥ त्वक्फलक्रिमिरोमाणिवस्त्रयोनिर्द्दश
त्रिषु१॥ वाल्कंक्षौमादिफालन्तुकार्पासम्बादरंचतत्२॥ कौशेयंक्रिमिकोशोत्थंराङ्कवंमृग
रोमजं२॥ अनाहतंनिष्प्रवाणितंत्रकंचनवाम्बरे३॥ तत्स्यादुद्गमनीयंयद्धौतयोर्वस्त्रयोर्युगं१॥ प
त्रोर्णंधौतकौशेयं२ बहुमूल्यंमहाधनं२॥ क्षौमन्दुकूलंस्यात्२ द्वेतुनिवीतंप्रावृतंत्रिषु२॥ स्त्रियां
बहुत्वेवस्त्रस्यदशाःस्युर्वस्तयोर्द्वयोः२॥ दैर्घ्यमायाम आरोहः३ परिणाहोविशालता२॥ पटच्च

न्वर्गः रज्जीर्णवस्त्रंसमौनक्तककर्पटौ२॥ वस्त्रमाच्छादनंवासश्चेलंवसनमंशुकं६॥ सुचेलकःपटोऽस्त्री
श्रमः स्याद्वराशिःस्थूलसाटकः२॥ निचोलःप्रच्छदपटः२समौरल्लककम्बलौ२॥ अन्तरीयोपसंव्या
४१ नपरिधानान्यधोंशुके४॥ द्वौप्रावारोत्तरासङ्गौसमौबृहतिकातथा॥ संव्यानमुत्तरीयंच्चचोलः
कूर्पासकोऽस्त्रियां२॥ नीशारःस्यात्प्रावरणेहिमानिलनिवारणे॥ अर्द्धोरुकंवरस्त्रीणांस्या
च्चण्डातकमंशुकं२॥ स्यात्त्रिष्वाप्रपदीनंतत्प्राप्नोत्याप्रपदंहितत्॥ अस्त्रीवितानमुल्लोचो२दूष्याद्यं
वस्त्रवेश्मनि२॥ प्रतिसीराजवनिकास्यात्तिरस्करिणीचसा३॥ परिकर्म्माङ्गसंस्कारःस्यान्माष्टि
र्म्मार्ज्जनीमृजा३॥ उद्वर्त्तनोत्सादनेद्वेसमे२आप्लावआप्लवः स्नानं३॥ चर्च्चातुचार्च्चिक्यंस्थासको
३ऽथप्रबोधनंसमः॥ अनुबोधः२पत्रलेखापत्राङ्गुलिरिमेसमे२॥ तमालपत्रतिलकचित्रका राम
णिविशेषकं४॥ द्वितीयंच्चतुरीयंच्चनस्त्रियां२ऽथकुङ्कुमं॥ काश्मीरजन्माऽग्निशिखंवरं ४१

रबाह्लीकपीतनं॥रक्तसङ्कोचपिशुनं धीरलोहितचन्दनं१०॥लाक्षाराक्षाजतुक्लीबे यावोऽलक्तोद्रुमा
लयः ११॥लवङ्गं देवकुसुमं श्रीसंज्ञमथ यावकं॥कालीयकञ्च कालानुसार्यंचाथ समार्थ
कं॥वंशिकागुरुराजार्हलोहकृमिजजोङ्गकं १२॥कालागुर्वगुरुः स्यात्तु मङ्गल्या मल्लिगन्धियत् १॥
यक्षधूपः सर्जरसो रालसर्वरसावपि॥बहुरूपोप्यथ वृकधूपकृत्रिमधूपकौ २॥तुरुष्कः पि
ण्डकः सिह्लो यावनोप्यथ पायसः॥श्रीवासो वृकधूपोपि श्रीवेष्टसरलद्रवौ ३॥मृगनाभिर्मृ
गमदः कस्तूरी चाथ कोलकं॥कक्कोलकं कोलफलमथ कर्पूरमस्त्रियां॥घनसारश्चन्द्रसं
ज्ञः सिताभ्रो हिमवालुका ४॥गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियां ५॥तैलपर्णिकगोशीर्षे हरिचं
दनमस्त्रियां ६॥तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनं॥कुचन्दनं चाथ जातीकोषजातिफले समे ७॥
कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः ८॥गात्रानुलेपनी वर्त्तिर्वर्णकं स्याद्विलेपनं ९॥चूर्णानि वास

अध्ययनमध्यापनंयाजनंदानं प्रतिग्रहश्चेतिषट्कर्म्माणियस्यासौषट्कर्म्मा २

नृवर्गः योगाः स्फरर्भाविते वासितं त्रिषु २॥ संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनं॥ माल्यं माला स्रजौ
श्रमः मूर्ध्नि केशमध्ये तु गर्भकः ४१॥ प्रभ्रष्टकं शिखालम्बि २ आभोगः परिपूर्णता २॥ उपधानं तूपव
४२ र्हः २ शय्यायां शयनीयवत्॥ शयनं २ मञ्चपर्य्यङ्कपल्यङ्काः खट्वया समाः ४४॥ गेन्दुकः कन्दुको २ दीपः
प्रदीपः २ पीठमासनं २॥ समुद्गकः संपुटकः २ प्रतिग्राहः पतद्ग्रहः २॥ प्रसाधनी कङ्कतिका २ पि
ष्टातः पटवासकः २॥ दर्प्पणे मुकुरादर्शौ ३ व्यजनं तालवृन्तकं २॥॥ ॥नृवर्गः॥ ॥ संततिर्गोत्रजन
नकुलान्यभिजनान्वयौ॥ वंशोन्ववायः संतानो ९ वर्णाः स्युर्ब्राह्मणादयः १॥ विप्रक्षत्रियविट्शूद्रा
श्चातुर्वर्ण्यमिति स्मृतं॥ आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः॥ विप्रश्च ब्राह्मणो ६ ऽसौ
षट्कर्म्मा यागादिभिर्युतः १॥ विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः॥ धीरो मनीषी ज्ञः प्रा रामः
ज्ञः संख्यावान् पण्डितः कविः॥ धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः॥ दूरदर्शी दीर्घदर्शी २ श्रो ४२

निषेकादिनि कर्म्माणि यः करोति यथाविधि संभावयति चान्नेन स विप्रो गुरुरुच्यते

त्रियश्छान्दसौ समौ २॥ उपाध्यायोऽध्यापकः स्यात् स्यान्निषेकादिकृद्गुरुः ॥ मंत्रव्याख्याकृदाचार्य्य
आदेष्टा त्वध्वरे व्रती ॥ यष्टा च यजमानश्च ३ स सोमवति दीक्षितः १॥ इज्याशीलो यायजूको ४ यज्वा तु वि
धिनेष्टवान् १॥ स गीःपतीष्ट्यास्थपतिः १ सोमपीती तु सोमपाः २॥ सर्ववेदाः स जेनेष्टो यागः सर्व
स्वदक्षिणः १॥ अनूचानः प्रवचने साङ्गेऽधीती १ गुरोस्तु यः ॥ लब्धानुज्ञः समावृत्तः १ सुत्वा त्वभिषवे कृ
ते १॥ छात्रान्तेवासिनौ शिष्ये ३ शैक्षाः प्राथमकल्पिकाः २॥ एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः १॥
सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित् १॥ पारंपर्य्योपदेशे स्यादैतिह्यमितिहाव्ययं २॥ उपज्ञा ज्ञा
नमाद्यं स्यात् १ ज्ञात्वारंभ उपक्रमः १॥ यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्म्मखः क्रतुः ७॥ पाठे होमश्चातिथी
नां सपर्य्या तर्पणं बलिः ॥ एते पंच महायज्ञा ब्रह्मयज्ञादिनामकाः ५॥ समज्या परिषद्गोष्ठी सभा
समितिसंसदः ॥ आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ९॥ प्राग्वंशः प्राग्घविर्गेहात्सदस

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो न

ब्रह्मवर्गः दस्याविधिदर्शिनः२॥ सभासदः सभास्ताराः सभ्याः सामाजिकाश्चते४॥ अध्वर्य्युद्गातृहोतारोयजुः
श्रमः सामर्ग्विदः क्रमात्३॥ आग्नीध्राद्याधिष्ण्याऋत्विजोयाजकाश्चते२॥ वेदिः परिष्कृताभूमिः समेस्थ
४३ ण्डिलचत्वरे२॥ चषालोयूपकटकः२ कुम्बासुगहनावृतिः१॥ यूपाग्रंतर्म्मनिर्म्मन्थ्यदारुणित्वरणी
द्वयोः२॥ दक्षिणाग्निर्गार्हपत्याहवनीयौत्रयोग्नयः३॥ अग्नित्रयमिदंत्रेताप्रणीतः संस्कृतोनलः२॥
समुह्यः परिचाय्योपचाय्यावग्नौप्रयोगिनः३॥ योगार्हपत्यादानीयदक्षिणाग्निःप्रणीयते॥ तस्मिं
न्नानाय्योथाग्नायीस्वाहाचहुतभुक्प्रिया३॥ ऋकसामिधेनीधाय्याचयास्यादग्निसमिन्धने२॥ गा
यत्रीप्रमुखंछन्दो हव्यपाकेचरुः पुमान्१॥ आमिक्षासाशृतोष्णेयाक्षीरेस्याद्दधियोगतः॥ धवित्रंव्य
जनंतद्यद्रचितंमृगचर्म्मणा१॥ पृषदाज्यंसदध्याज्येपरमान्नंतुपायसं२॥ हव्यकव्येदैवपैत्र्ये रामः
अन्नेपात्रंस्रुवादिकं१॥ ध्रुवोपभृज्जुहूर्नातुस्रुवोभेदाःस्रुचःस्त्रियः२॥ उपाकृतःपशुरसौयो ४३

भिमंत्र्य क्रतौ हुतः१॥ परंपराकं शासनं प्रोक्षणं च वधार्थकं३॥ वाच्यलिंगाः प्रमितोपसंपन्नप्रोक्षि
ता हताः४॥ सांनाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतं१॥ दीक्षान्तोऽवभृथो यज्ञे तत्कर्मार्हं तु यज्ञि
यं१॥ त्रिष्वथ क्रतुकर्मेष्टं१ पूर्तं खातादिकर्म यत्१॥ अमृतं विघसो यज्ञशेषभोजनशेषयोः
त्यागो विहापितं दानमुत्सर्जनविसर्जने॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनं॥ प्रादेशनं नि
र्वपनमपवर्जनमंहतिः३॥ मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकं१॥ पितृदानं निवापः स्यात्२ श्रा
द्धं तत्कर्म शास्त्रतः१॥ अन्वाहार्यं मासिकं१ शोष्टमो ह्नः कुतपोऽस्त्रियां१॥ पर्येषणा परीष्टिश्चा
न्वेषणा च गवेषणा४॥ सनिस्त्वध्येषणा याञ्चाऽभिशस्तिर्याचनाऽर्थना४॥ षट् च त्रिष्वर्घ्यम
र्घार्थे१ पाद्यं पादाय वारिणी१॥ क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि२॥ स्यादावेशि
क आगन्तुरतिथिर्ना गृहागते२॥ प्राघूर्णकः प्राहुणकोऽथाभ्युत्थानं तु गौरवं२॥ पूजा नम

पद्येऽध्यापनमौनादिके संबोध मार्गाख्ये भिक्षुव्रते स्थितिरनुष्ठानं पथि स्थितिः २

ब्रह्मव स्याऽपचितिः सपर्य्यार्चार्हणाः समाः ६॥ वरिवस्या तु शुश्रूषा परिचर्य्याप्युपासनं ४॥ व्रज्या
ग्रम: टाट्या पर्य्यटनं ३ चर्य्या त्वीर्य्यापथे स्थिति ॥ नियमो व्रतमस्त्रीशं तच्चोपवासादि पुण्यकं २॥ उपव
४४ स्तोत्वपवासोऽश विवेकः पृथगात्मता २॥ स्याद्ब्रह्मवर्च्चसं वृत्ताध्ययनर्द्धिरःऽथांजलिः ॥ पाठे ब्रह्मांज
लिः १ पाठे विप्रुषो ब्रह्मविंदवः १॥ ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ ३॥ मुख्यः स्यात्प्र
थमकल्पोऽनुकल्पस्ततोऽधमः १॥ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः १॥ समे तु पादग्रहण
मभिवादनमित्युभे २॥ भिक्षुः परिव्राट् कर्म्मंदी पारासर्य्यपि मस्करीप ॥ तपस्वी तापसः पा
रिकांक्षि ३ वाचंयमो मुनिः २॥ तपःक्लेशसहो दांतो २ वर्णिनो ब्रह्मचारिणः २॥ ऋषयः सत्यवच
सः २ स्नातकस्त्वाप्लुतव्रती १॥ ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते २॥ यः स्थंडिले व्रतवशा राम
च्छेते स्थंडिलशाय्यसौ ॥ स्थांडिलश्चाऽथ विरजस्तमसः स्युर्द्वयातिगाः २॥ पवित्रः प्रयतः पू ४४

तः३ पाषण्डाः सर्वलिङ्गिनः॥ पालाशो दण्ड आषाढो व्रते रांभस्तु वैणवः१॥ अस्त्री कमण्डलुः कु
ण्डी१ व्रतिनामासनं वृषी२॥ अजिनं चर्म्म कृत्तिः स्त्री३ भैक्ष्यं भिक्षाकदम्बकं१॥ स्वाध्यायः स्या
ज्जपः२ सुत्याऽभिषवः सवनं च सा३॥ सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणं१॥ दर्शश्च पौ
र्णमासश्च यागौ पक्षान्तयोः पृथक्२॥ शरीरसाधनापेक्षं नित्यं यत्कर्म्म तद्यमः१॥ नियमस्त
स यत्कर्म्मानित्यमागन्तुसाधनं१॥ क्षौरन्तु भद्राकरणं मुण्डनं वपनं त्रिषु४॥ कक्षापटी चकौ
पीनं२ स्टाचस्त्री तिलस्तनः३॥ उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे१॥ प्राचीनावीतमन्यस्मिन्२ नि
वीतं कण्ठलम्बितं३॥ अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्म्मूले कायं॥ मध्येऽङ्गुष्ठाङ्गुल्योः पैत्र्यं१
मूले त्वङ्गुष्ठस्य ब्राह्मं॥ स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि३॥ देवभूयादिकं तद्वत् कृच्छ्रं
सान्तपनादिकं॥ संन्यासवत्यनशने पुमान् प्रायोऽथ वीरहा॥ नष्टाग्निः२ कुहनालोभान्मि

निराकृयते वेदहीनत्वान्निराकृतिः आकृतेर्जातेर्वा निष्क्रान्तः अध्ययनं नास्ति तु यो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः इति स्मृतेः

ब्रह्मव योर्थापथकल्पना ॥ व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः २ ॥ धर्म्मध्वजी लिङ्गवृत्तिर्
श्रमः अवकीर्णी क्षतव्रतः २ ॥ सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ अंशुमानभिनिर्म्मुक्ताभ्युदितौ तौ य
४५ थाक्रमं २ ॥ परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् १ ॥ परिवित्तिस्तु तज्ज्यायान् विवाहोपयमौ स
मौ ॥ तथा परिणयोद्वाहोपयामाः पाणिपीडनं ॥ व्यवायो ग्राम्यधर्म्मो मैथुनं निधुवनं रतं ॥
त्रिवर्गो धर्म्मकामार्थैश्चतुर्वर्गः समोक्षकैः ॥ सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ॥ ॥
॥ ब्रह्मवर्गः ॥ ॥ मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ॥ राजा राट् पार्थिवः क्ष्माभृन्नृ
पभूपमहीक्षितः ॥ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥ चक्रवर्त्ती सार्वभौमो नृपोऽन्यो
मण्डलेश्वरः ॥ येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राज रामः
कं ॥ राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ॥ मन्त्री धीसचिवोऽमात्योऽन्ये कर्म्मसचिवा ४५

स्ततः१॥ महामात्राः प्रधानानि२ पुरोधास्तु पुरोहितः२॥ द्रष्टरि व्यवहाराणां प्राड्विवाकाक्ष
दर्शकौ३॥ प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः५॥ रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षा
धिकृतौ समौ२॥ स्थायुकोऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु१॥ भौरिकः कनकाध्यक्षो रू
प्याध्यक्षस्तु नैष्किकः२॥ अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः१॥ सौविदल्लाः कंचुकिनः स्था
पत्याः सौविदाश्च ते४॥ शण्ढो वर्षवरस्तुल्याः सेवकार्थ्यनुजीविनः३॥ विषयानन्तरो राजा श
त्रुर्मित्रमतः परं१॥ उदासीनः परतरः१ पार्ष्णिग्राहस्तु पृष्ठतः१॥ रिपौ वैरिसपत्नारिद्विषद्द्वे
षणदुर्हृदः॥ द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः॥ अभिघातिपरारातिप्रत्यर्थिपरिपंथि
नः॥ ध्यातव्यासहनद्विषिजिघांसुप्रत्यनीकिनः२४॥ वयस्यः स्निग्धः सवयाः३ अथ मित्रं स
खा सुहृत्३॥ सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनं२॥ यथार्हवर्णः प्रणिधिरपसर्पश्च

क्षत्रियवर्गः रः स्पशः॥चारश्चगूढपुरुष२श्चाप्तःप्रत्ययितस्त्रिषु२॥सांवत्सरोज्योतिषिकोदैवज्ञगण
अमः कावपि॥स्युर्म्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि८॥ तान्त्रिकोज्ञातसिद्धान्तः२सत्रीगृह
४६ पतिःसमौ२॥लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्चलेखके४॥मेलानन्दामसिमणिर्म्मेलाधुर्म्मषी
कूपिका॥लेखनीवर्णतूलास्यात्दूर्णाङ्कोऽक्षरतूलिका॥लिखिताक्षरसंस्थानेलिपिर्ल्लिबि
रुभेस्त्रियौ२॥स्यात्संदेशहरोदूतो२दूत्यंतद्भावकर्म्मणी॥अध्वनीनोऽध्वगोऽध्वन्यःपान्थः
पथिकइत्यपि५॥स्वाम्यमात्यःसुहृत्कोषोराष्ट्रदुर्गबलानिच७॥राज्याङ्गानिप्रकृतयःपौराणां
श्रेणयोऽपिच२॥सन्धिर्न्नाविग्रहोयानमासनंद्वैधमाश्रयः॥षड्गुणाः६शक्तयस्तिस्रःप्रभावो
त्साहमन्त्रजाः३॥क्षयःस्थानंचवृद्धिश्चत्रिवर्गोनीतिवेदिनां३॥सप्रतापःप्रभावश्चयत्तेजः रामः
कोशदण्डजं२॥भेदोदण्डःसामदानमित्युपायचतुष्टयं४॥साहसंतुदमोदण्डः३सामस ४६

त्वरः२ मथोसमौ ॥ भेदोपजापावुपधा धर्म्माद्यैर्यत्परिक्षणं२॥ पञ्चत्रिष्वषड्क्षीणोयस्तृती
याद्यगोचरः२॥ विविक्तविजनछन्ननिःशलाकास्तथारहः॥ रहश्चोपांशुचालिङ्गेर हस्यंतद्भवे
त्रिषु१॥ समौविश्रम्भविश्वासौ२ भ्रेषोभ्रंशोयथोचितात्॥ अभ्रेषन्यायकल्पास्तु देशरूपंस
मंजसं५॥ युक्तमौपयिकंलभ्यंभजमानाभिनीतवत्॥ न्याय्यंचत्रिषुषट्६ सम्प्रधारणातु
समर्थनं२॥ अववादस्तुनिर्द्देशोनिदेशःशासनंचसः॥ शिष्टिश्चाज्ञाच६ संस्थातु मर्य्यादाधा
रणास्थितिः४॥ आगोऽपराधोमन्तुश्च३ समेउद्दानबन्धने२॥ द्विपाद्योद्विगुणोदण्डो२ भाग
धेयःकरोबलिः३॥ घट्टादिदेयंशुल्कोऽस्त्री१ प्राभृतंतुप्रदेशनं॥ उपायनमुपग्राह्यमुपहा
रस्तथोपदा६॥ यौतकादितुयद्देयंसुदायोहरणंचतत्२॥ तत्कालस्तुतदात्वंस्यादुत्तरःकालआ
यतिः२॥ सांदृष्टिकंफलंसद्यउदर्कःफलमुत्तरं१॥ अदृष्टंवह्नितोयादि दृष्टंस्वपरच

क्षत्रियवर्गः क्रजं १॥ महीभुजामहिभयं स्वपक्षप्रभवं भयं १॥ प्रक्रिया त्वधिकारः स्यात् २ चामरं तु प्रकी
अम: र्णकं २॥ नृपासनं यत्तद्भद्रासनं २ सिंहासनं तु तत्॥ हैमं छत्रं त्वातपत्रं २ राज्ञस्तु नृपलक्ष्म
४७ तत् १॥ भद्रकुंभः पूर्णकुंभो २ भृङ्गारः कनकालुका २॥ निवेशः शिबिरं षण्ढे २ सज्जनं तूपरक्ष
णं २॥ हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयं॥ दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः
मतङ्गजो गजो नागः कुञ्जरो वारणः करी॥ इभः स्तम्बेरमः पद्मी १० यूथनाथस्तु यूथपः २
॥ मदोत्कटो मदकलः २ कलभः करिशावकः २॥ प्रभिन्नो गर्जितो मत्तः ३ समावुद्वान्तनिर्म
दौ २॥ हास्तिकं गजता वृन्दे २ करिणी धेनुका वशा ३॥ गंडः कटो मदो दानं ४ वमथुः करशीकरः
२॥ कुंभौ तु पिंडौ शिरसः २ तयोर्मध्ये विदुः पुमान् १॥ अवग्रहो ललाटं स्यात् २ ईषिका त्वक्षि राम:
कूटकं १॥ अपाङ्गदेशो निर्याणं १ कर्णमूलं तु चूलिका १॥ अधः कुंभस्य वाहित्थं १ प्रतिमा ४७

नमध्योऽस्य वा ०॥ आसनं स्कन्धदेशः स्यात् पद्मकं बिन्दुजालकं ९॥ पक्षभागः पार्श्वभागो दन्
तभागस्तु योऽग्रतः १॥ द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावनेक्रमात् २॥ तोत्रं वैणुकमालानं
बन्धस्तम्भेऽथ शृंखले ॥ अन्दुको निगलोऽस्त्री स्यादंकुशोऽस्त्री सृणिः स्त्रियां ४॥ दूष्या क
क्ष्या वरत्रा स्यात् कल्पना सज्जना समे ४॥ प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथा द्वयोः ५॥ वीतं
त्वसारं हस्त्यश्वं वारी तु गजबन्धनी २॥ घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥ वाजिवाहार्वगं
न्धर्वहयसैन्धवसप्तयः १३॥ आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः २॥ वनायुजाः
पारसीकाः काम्बोजा बाह्लिका हयाः ४॥ ययुरश्वोऽश्वमेधीयो जवनस्तु जवाधिकः २॥ पृष्ठ्यः स्थौ
रीः सितः कर्क्को रथ्यो वोढा रथस्य यः १॥ बालः किशोरो वाम्यश्वा वडवा वाडवं गणे ॥ त्रिष्वा
श्वीनं यदश्वेन दिनेनैकेन गम्यते १॥ कश्यं तु मध्यमश्वानां हेषा ह्रेषा च निस्वनः २॥ निगालस्तु

क्षत्रिवर्गः गलोद्देशे स्कंधदेशस्त्वस्त्रीयमाग्रवत ॥ आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतं ॥ गतयोऽमूः पञ्च धा
अमः राः ॥१ घोणा तु प्रोथमस्त्रियां ॥२ कविका तु खलीनोऽस्त्री शफं क्लीवे खुरः पुमान् ॥२ पुच्छोऽस्त्री लू
४८ मलांगुले ३ वालहस्तश्च वालधिः ॥२ त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ याने चक्रिणि यु
द्धार्थे शतांगः स्यंदनो रथः ॥३ असौ पुष्यरथश्चक्रयानं न समराय यत् ॥१ कर्णीरथः प्रवहणं डु
यनं च समं त्रयं ॥३ क्लीवेऽनः शकटोऽस्त्री स्यात् गन्त्री कम्बलिवाह्यकं ॥ शिविका याप्ययानं स्या
द् दोला प्रेंखादिकाः स्त्रियां ॥२ उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥२ पाण्डुकम्बलसम्वीतः स्य
न्दनः पाण्डुकम्बली ॥ रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते ॥ त्रिषु द्वैपादयो रथ्या रथक
ड्या रथव्रजे ॥ धूः स्त्री क्लीवे यानमुखं स्याद्रथांगमपस्करः ॥२ चक्रं रथांगं तस्यान्ते नेमिः स्त्री रामः
स्यात्प्रधिः पुमान् ॥२ पिण्डिका नाभिरक्षाग्रकीलके तु द्वयोरणिः ॥२ रथगुप्तिर्वरूथो ना रक् ४८

वरस्तु युगन्धरः १ ॥ अनुकर्षो दार्वधःस्थः प्रासंङ्गोन्यो युगाद्युगः १ ॥ सर्वं स्याद्वाहनं यानं युग्यं पत्रं
च धोरणं ५ ॥ परंपरावाहनं यत्तद्वैनीतकमस्त्रियां १ ॥ आधोरणा हस्तिपका हस्त्यारोहा नि
षादिनः ४ ॥ भक्षारनियंता प्राजिता यंता सूतः सत्ता च सारथिः ॥ सव्येस्थदक्षिणस्थो च संज्ञा र
थकुटुम्बिनः २ ॥ रथिनः स्यन्दनारोहाः २ अश्वारोहास्तु सादिनः २ ॥ भटा योधाश्च योद्धारः ३ सेना
रक्षास्तु सैनिकाः १ ॥ सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते २ ॥ बलिनो ये सहस्रेण ते साहस्र
स्राः सहस्रीणः २ ॥ परिधिस्थः परिचरः २ सेनानीर्वाहिनीपतिः २ ॥ कंचुको वारवाणोऽस्त्री २
यत्तु मध्ये सकंचुकाः १ ॥ बध्नंति तत्सारसनमधिकांङ्गः १ ऽथ शीर्षकं ॥ शीर्षण्यं च शिरस्त्रे ३ ऽथ
तनुत्रं वर्म्म दंशनं ॥ उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियां ४ ॥ आमुक्तः प्रतिमुक्तश्च पिन
द्धश्चापिनद्धवत् ४ ॥ सन्नद्धो वर्म्मितः सज्जो दंशितो व्यूढकंकटः ५ ॥ त्रिष्वामुक्तादयो वर्म्मभृतोऽङ्का

क्षत्रिवर्गः वत्रिकं ङ्कुरोण॥ पदातिपत्तिपदगपदातिकपदाजयः॥ पद्गश्चपदिकश्चाऽथपादातंपत्तिसंहतिः९॥
श्रमः शस्त्राजीवेकाण्डपृष्ठायुधीयायुधिकाः समाः४॥ कृतहस्तः सुप्रयोगविशिखः कृतपुंखवत्१॥
४९ अपराद्धपृषत्कोऽसौलक्ष्याद्यश्च्युतसायकः१॥ धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्रीधनुर्धरः६॥
स्यात्काण्डवांस्तुकाण्डीरः२ शाक्तिकः शक्तिहेतिकः२॥ याष्टीकपारश्वधिकौयष्टीपरश्वहेति
कौ२॥ नैस्त्रिंशिकोऽसिहेतिः स्यात्२ समौप्रासिककौन्तिकौ२॥ चर्मीफलकपाणिः स्यात्२ पताकी
वैजयन्तिकः२॥ अनुप्लवः सहायश्चानुचरोभिसरः समाः४॥ पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरः
सराः॥ पुरोगमः पुरोगामी७ मन्दगामीतुमन्थरः२॥ जङ्घालोतिजवे२ स्तुल्योजङ्घाकारिकजांघि
कौ२॥ तरस्वीत्वरितोवेगीप्रजवनोजवः६॥ जय्योयःशक्यतेजेतुं१ जेयोजेतव्यमात्रके१॥ जैत्रस्तु रामः
जेता२ योगच्छत्यलंविद्विषतःप्रति॥ सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीणइत्यपि३॥ ऊर्जस्व ४९

लः स्यादुर्ज्जस्वी य उर्ज्जोतिशयान्वितः२॥ स्यादुरस्वानुरसिलो२ रथिको रथिलो रथी३॥ कामंगा
म्यनुकामीनो ह्यत्यन्तीनस्तथा भृशं४॥ शूरो वीरश्च विक्रान्तो२ जेता जिष्णुश्च जित्वरः३॥ सांयु
गीनो२ रणे साधुः१ शस्त्राजीवादयस्त्रिषु॥ ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः॥ वरू
थिनी बलं सैन्यं चक्रं चानीकमस्त्रियां॥ व्यूहस्तु बलविन्यासो२ भेदा दण्डादयो युधि॥ प्रत्या
सारो व्यूहपार्ष्णिः२ सैन्यपृष्ठे परिग्रहः२॥ एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका॥ पत्त्यङ्गैस्त्रि
गुणैः सर्वैः क्रमादाख्या यथोत्तरं॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः॥ अनीकिनी दशा
नीकिन्योऽक्षौहिण्य१थ संपदि॥ संपत्तिः श्रीश्च लक्ष्मीश्च४ विपत्त्यां विपदापदौ२॥ आयुधं तु प्र
हरणं शस्त्रमस्त्रमथास्त्रियौ॥ धनुश्चापौ धन्वशरासनकोदण्डकार्म्मुकं॥ इष्वासोप्य१ऽथ क
र्णस्य कालपृष्ठं शरासनं॥ कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ२॥ कोटिरस्याटनी

गोधे तलेज्याघातवारणे ३ ॥ लस्तकस्तु धनुर्म्मध्यं मौर्वी ज्या शिञ्जिनी गुणः ४ ॥ स्यात्प्रत्यालीढ
मालीढमित्यादिस्थानपञ्चकं ॥ लक्षं लक्ष्यं शरव्यञ्च ३ शराभ्यास उपासने २ ॥ पृषत्कबाणवि
शिखा अजिह्मगखगाशुगाः ॥ कलम्बमार्ग्गणशराः पत्री रोप इषुर्द्वयोः २१ ॥ प्रक्ष्वेडनास्तु ना
राचाः २ पक्षो वाजस्त्रिषूत्तरे ॥ निरस्तः प्रहिते बाणे विषाक्ते दिग्धलिप्तकौ ३ ॥ तूणोपासङ्गतूणी
रनिषङ्गा इषुधिर्द्वयोः ॥ तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ॥ कौक्षेयको मण्डलाग्रः क
रवालः कृपाणवत् ॥ त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्धनं ॥ फलकोऽस्त्री फलं चर्म्म
सङ्ग्राहो मुष्टिरस्य यः ॥ द्रुघणो मुद्गरघनौ स्यादीली करवालिका ३ ॥ भिन्दिपालः सृगस्तुल्यौ २
परिघः परिघातनः २ ॥ द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ४ ॥ स्याच्छस्त्री चासिपुत्री च छुरिका
चासिधेनुका ४ वा पुंसि शल्यं शङ्कुर्ना सर्वला तोमरोऽस्त्रियां ३ ॥ प्रासस्तु कुन्तः २ कोणस्तु स्त्रियः पा

स्त्री कोटयः४॥ सर्वाभिसारः सर्वौघः सर्वसन्नहनार्थकः॥ लोहाभिसारोऽस्त्रभृतां राज्ञां
नीराजनाविधिः१॥ यत्सेनयाभिगमनमरौ तदभिषेणनं१॥ यात्रा व्रज्याभिनिर्याणं प्रस्था
नं गमनं गमः६॥ स्यादासारः प्रसरणं२ प्रचक्रं चलितार्थकं२॥ अहितान् प्रत्यभीतस्य रणे या
नमभिक्रमः१॥ वैतालिका बोधकराश्चाक्रिका घांटिकासमाः४॥ स्युर्मागधास्तु मगधा
श्ववन्दिनः स्तुतिपाठकाः३॥ संशप्तकास्तु समयात्संग्रामादनिवर्त्तिनः१॥ रेणुर्द्वयोः स्त्रियां धूलिः
पांशुर्ना न द्वयो रजः४॥ चूर्णे क्षोदः१ समुत्पिञ्जपिञ्जलौ भृशमाकुले२॥ पताका वैजयन्ती२ स्या
त्केतनं ध्वजमस्त्रियां२॥ सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा१॥ अहंपूर्वमहंपूर्वमित्य
हंपूर्विका स्त्रियां१॥ आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि१॥ अहमहमिका तु सा स्यात्प
रस्परं यो भवत्यहंकारः१॥ द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च॥ शक्तिः पराक्रमः प्राणो०

क्षत्रिवर्गः विक्रमस्त्वातिशक्तिता॥ वीरपानंतुयत्पानंवृत्तेभाविनिवारणेग॥ युद्धमायोधनंजन्यंप्रधनंप्र
खम: विदारणं॥ मृधमास्कन्दनंसंख्यंसमीकंसांपरायिकं॥ अस्त्रियांसमरानीकरणाःकलहविग्रहौ॥
५१ संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः॥ अभ्यामर्द्दसमाघातसंग्रामाऽभ्यागमाहवाः॥ समु
दायःस्त्रियःसंयत्समित्याजिसमिद्युधः३॥ नियुद्धंवाहुयुद्धेस्यात्तुमुलंरणसंकुलेश॥ क्ष्वेडातुसिं
हनादःस्यात्करिणांघटनाघटा२॥ क्रन्दनंयोधसंरावोबृंहितंकरिगर्ज्जितं२॥ विस्फारोधनुषः
स्वानःपटहाडम्बरौसमौ२॥ प्रसभस्तुवलात्कारोहठोऽथस्खलितंछलं२॥ अजन्यंक्लीवमुत्पात
उपसर्गःसमंत्रयं३॥ मूर्छातुकश्मलंमोहोप्यवमर्द्दस्तुपीडनं२॥ अभ्यवस्कंदनंत्वभ्यासादनं
विजयोजयः२॥ वैरशुद्धिःप्रतीकारोवैरनिर्यातनंचसा३॥ प्रद्रावोद्द्रावसंद्रावसंदावाविद्रवो रामः
द्रवः॥ अपक्र[redacted]मोऽपयानंचरणेभङ्गःपराजयः२॥ पराजितपराभूतौत्रिषुनष्टतिरोहितौ२॥ ५१

प्रमापणं निवर्हणं निकारणं विशारणं ॥ प्रवासनं परासनं निसूदनं निहिंसनं ॥ निर्वासनं सं
ज्ञपनं निर्ग्रंथनमपासनं ॥ निस्तर्हणं निहननं क्षणनं परिवर्जनं ॥ निर्वापणं विशसनं मा
रणं प्रतिघातनं ॥ उद्वासनं प्रमथनं क्रथनोज्जासनानि च ॥ आलंभः पिंज विशर घातोन्माथव
धा अपि ३० ॥ स्यात्पंचता कालधर्मो दिष्टांतः प्रलयोत्ययः ॥ अंतो नाशो द्वयोर्मृत्युर्मरणं निध
नोऽस्त्रियां १० ॥ परासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः ॥ मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रि
यः ३ ॥ कबंधोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरं १ ॥ श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रियां २ ॥
प्रग्रहोपग्रहौ बंद्यां कारा स्याद्बंधनालये ॥ पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणं ॥
आयुर्जीवितकालो नाऽजीवातुर्जीवनौषधं ॥ ॥ क्षत्रिवर्गः ॥ ॥ ॥ ॥ ऊरव्या ऊरुजा अर्य्या वैश्या
भूमिस्पृशो विशः ६ ॥ आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ स्त्रियां कृषिः पाशुपाल्यं वा

वैश्यवर्गः णिज्यं चेति वृत्तयः॥ सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतं२॥ द्वे याचितायाचितयोर्य्यथासंख्यं
अमः मृतामृते२॥ सत्यानृतं वाणिग्भावः२ स्याहृणं पर्युदञ्चनं॥ उद्धारो३ऽर्थप्रयोगस्तु कुसीदं वृद्धि
५२ जीविका३॥ याच्ञयाप्तं याचितकं२ निमयादापमित्यकं॥ उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ
क्रमात्२॥ कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः४॥ क्षेत्राजीवः कर्षकश्च कृषकश्च कृषी
वलः४॥ क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितं२॥ यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत्॥
तिल्यं तैलीनवन्माषोमाणुभङ्गाद्विरूपता॥ मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमं॥ बीजा
कृतं तूप्तकृष्टे२ सीत्यं कृष्टं च हल्यवत्३॥ त्रिगुणाकृतेन्तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि४॥ त
स्मिन्द्विगुणाकृते तु सर्वं शंबाकृतमपीह॥ द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः॥ खा रामः
रीवापस्तु खारीकः३ उत्तमर्णादयस्त्रिषु॥ पुंनपुंसकयोर्व्वप्रः केदारः क्षेत्रमस्य तु॥ कैदारकं ५२

स्यात्कैदार्य्यं क्षैत्रं कैदारीकं गणे ८॥ लोष्टानि लेष्टवः पुंसि कोटिशो लोष्टभेदनः २॥ प्राजनं तोद
नं तोत्रं खनित्रमवदारणे २॥ दात्रं लवित्रमाबन्धो योत्रं योक्त्रमथो फलं॥ निरीशं कुटकं फा
लः कृषिको लाङ्गलं हलं॥ गोदारणं च सीरोऽथ शम्या स्त्री युगकीलकः २॥ ईशा लाङ्गलदण्डः
स्यात्सीता लाङ्गलपद्धतिः २॥ पुंसि मेधिः खले दारु न्यस्तं यत्पशुबन्धने॥ आशुव्रीहिः पाटलः
स्याच्छितशूकयवौ समौ २॥ तोक्मस्तत्र हरिते कलायस्तु सतीनकः॥ हरेणुरेणुकौ चा
स्मिन् कोरदूषस्तु कोद्रवः २॥ मङ्गल्यको मसूरोऽथ मकुष्टकमयुष्टकौ॥ वनमुद्गे ३ सर्षपे
तु द्वौ तु तन्तुभकदम्बकौ ३॥ सिद्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ २॥ स्याद्यावकस्तु कुल्मा
षश्चणको हरिमन्थजः २॥ द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निःफले २॥ क्षवः क्षुधाभिजननौ
राजिका कृष्णिकासुरी ५॥ स्त्रियौ कङ्गुप्रियङ्गू द्वे अतसी स्यादुमा क्षुमा ३॥ मातुलानी तु भङ्गायां

२ व्रीहिभेदस्त्वणुःपुमान् २॥ किंशारुःसस्यशूकेस्यात्कणिसंसस्यमंजरी २॥ धान्यंत्वव्रीहिःस्त
म्बकरिःस्तम्बोगुच्छस्तृणादिनः १॥ नाडीनालंचकाण्डोस्यपलालोस्त्रीसनिःफलः॥ क
डङ्गरोवुसंक्लीवेरधान्यत्वचिपुमांस्तुषः १॥ शूकोस्त्रीश्लक्ष्णतीक्ष्णाग्रेशमीशिम्बाशत्रिषूत्तरे॥
ऋद्धमावसितंधान्येरपूतंतुबहुलीकृते २॥ माषादयःशमीधान्येरशूकधान्येयवादयः १॥
शालयःकलमाद्याश्चषष्टिकाद्याश्चपुंस्यमी॥ तृणधान्यानिनीवाराः १स्त्रीगवेधुर्गवेधुका॥
अयोग्रेमुसलोस्त्रीस्यादुदूखलमुलूखलं २॥ प्रस्फोटनंशूर्पमस्त्रीरचालनीतितउःपुमान् २॥
स्यूतप्रसेवौरकण्डोलपिटौरकटकिलिञ्जकौ २॥ समानौरसवत्यांतुपाकस्थानमहानसे ३॥ पौरो
गवस्तदध्यक्षःरसूपकारास्तुवल्लवाः॥ आरालिकाआन्धसिकाःसूदाऔदनिकागुणाः ७॥ आपूपि
कः ४ कान्दविकोभक्ष्याकारइमेत्रिषु ३॥ अश्मन्तमुद्धानमधिश्रयणीचुल्लिरन्तिका ५॥ अङ्गारधानिका

ङ्गारशकट्यपि॥ हसन्यप्य४ऽथन स्त्रीस्यादङ्गारोऽलातमुल्मुकं३॥ क्लीबेंम्वरीषं भ्राष्ट्रो
ना२ कन्दुर्वा स्वेदनी स्त्रियां२॥ अलिञ्जरः स्यान्मणिकः२ कर्कर्यालूर्गलंतिका३॥ पिठरः स्याल्यु
षा कुंडं४ कलशस्तु त्रिषु द्वयोः॥ घटः कुटनिपावस्त्री४ शरावो वर्द्धमानकः२॥ ऋजीषं पिष्ट
पचनं२ कंसोऽस्त्री पानभाजनं२॥ कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्२॥ सर्वमावव
पनं भांडं पात्रामत्रं च भाजनं५॥ दर्विः कम्बिः खजाका च३ स्यात्तर्दूर्दारुहस्तकः२॥ अस्त्री शा
कं हरितकं२ शिग्रुरस्य तु नाडीका॥ कडम्बश्च कलम्बश्च२ वेसवार उपस्करः२॥ तिंतिडीकं च चु
क्रं च वृक्षाम्लं३ मथ वेल्लजं॥ मरिचं कोलकं कृष्णमूषणं धर्मपत्तनं६॥ जीरको जरणोऽजाजी क
णा४ कृष्णे तु जीरके॥ सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका५॥ आर्द्रकं शृङ्गवेरं स्यादथ
छत्रा वितुन्नकं॥ कुस्तुम्बुरु च धान्याकम४ऽथ शुंठी महौषधं॥ स्त्रीनपुंसकयोर्विश्वं नागरं वि

अमः ५४ श्च भेषजेऽपि॥ आरनालकसौवीरकुल्माषाभिषुतानि तु॥ अवन्तिसोमधान्याम्लकुंजलानि च
कांजिकं॥ सहस्रवेधि जतुकं बाह्लीकं हिंगु रामठं॥ तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृ
थुः ४॥ निशाह्वा कांचनी पीता हरिद्रा वरवर्णिनी॥ सामुद्रं यत्तु लवणमक्षीबं वशिरं च तत् ४३॥
सैन्धवोऽस्त्री शीतशिवं माणिमन्थं च सिंधुजे ४॥ रौमकं वसुकं पाक्यं बिडं च कृतके द्वयं ४॥ सौ
वर्चलेऽक्षरुचके ३ तिलकं तत्र मेचकं ४॥ मत्स्यंडी फाणितं खंड विकारे ४ शर्करा सिता ४२॥ कूर्चि
का क्षीरविकृतिः स्याद्रसाला तु मार्जिता ४२॥ स्यात्तेमनं तु निष्ठानं ४ त्रिलिंगा वासितावधेः॥ शूला
कृतं भटित्रं च शूल्यमुख्यं तु पैठरं ४॥ कुदध्नि तमौ दध्नित्क ४ मुदश्विताश्च संस्कृते ४॥ प्रणीत
मुपसंपन्नं ४ प्रयस्तं स्यात्सुसंस्कृतं ४॥ स्यात्पिच्छिलं तु विजिलं ४ संमृष्टं शोधितं समे ४॥ चिक्क रामः
णं मसृणं स्निग्धं ३ तुल्ये भावितवासिते ४॥ आपक्वं पौलिरभ्यूषो ३ लाजाः पुंभूम्नि चाक्षताः ४॥ ५४

पृथुकः स्याच्चिपिटको धाना भ्रष्टयवे स्त्रियः १॥ पूपोऽपूपः पिष्टकः स्यात्करंभो दधिशक्त
वः १॥ भिंसा स्त्री भक्तमंधोऽन्नमोदनोऽस्त्री स दीदिविः २॥ भिंसटा दग्धिका सर्वरसाग्रे मं
डमस्त्रियां॥ मासराचामनिःस्रावा मंडे भक्तसमुद्भवे ३॥ यवागूरुष्णिका श्राणा विलेपी त
रला च सा ४॥ गव्यं त्रिषु गवां सर्वं गोविड्गोमयमस्त्रियां २॥ तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः
समं ३॥ पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरं १॥ घृतमाज्यं हविः सर्पिः ४ नवनीतं नवोद्धृ
तं २॥ तत्तु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतं॥ दंडाहतं कालशेयमरिष्टमपि गोरसः ४॥ तक्रं
ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलं ३॥ मंडं दधिभवं मस्तु पीयूषोऽभिनवं पयः २॥ अ
शनाया बुभुक्षा क्षुत् ग्रासस्तु कवलार्थकः ३॥ सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनं २॥
उदन्या तु पिपासा तृट् तर्षो जग्धिस्तु भोजनं॥ जेमनं लेप आहारो निघसो न्याद इत्यपि ३॥

अम:
५५

सौहित्यंतर्प्पणंतृप्तिः३फेलाभुक्तसमुज्झितं१॥ कामम्प्रकामम्पर्य्याप्तंन्निकामेष्टंयथेप्सितं६॥
गोपेगोपालगोसंख्यगोधुगाभीरवल्लवाः६॥ गोमहिष्यादिकंपादबन्धनं२ द्वौगवीश्वरे॥ गोमा
न्गोमी३गोकुलंतुगोधनंस्याद्गवांव्रजे३॥ त्रिष्वाशितंगवीनंतद्गावोयत्राशिताःपुरा१॥ उक्षा
भद्रोबलीवर्द्दऋषभोवृषभोवृषः॥ अनड्वान्सौरभेयोगौ८रुक्ष्णांसंहतिरौक्षकं१॥ गव्यागोत्रा
गवां२वत्सधेन्वोर्वात्सकधैनुकं२॥ वृषोमहान्महोक्षःस्याद्वृद्धोक्षस्तुजरद्गवः२॥ उत्पन्नउक्षा
जातोक्षः१सद्योजातस्तुतर्णकः१॥ शकृत्करिस्तुवत्सःस्याद्दम्यवत्सतरौसमौ२॥ आर्षभ्यःषण्ड
तायोग्यः२षण्डोगोपतिरिट्चरः३॥ स्कंधप्रदेशेस्तुवहः२सास्नातुगलकम्बलः२॥ स्यान्नस्तितस्तुनस्यो
तः२प्रष्ठवाड्युगपार्श्वगः२॥ युगादीनांतुवोढारोयुग्यप्रासंगशाकटाः३॥ खनतितेनतद्वो
ढाऽस्येदंहालिकसैरिकौ२॥ धूर्वहेधुर्य्यधौरेयधुरीणाःसधुरंधराः५॥ उभावेकधुरीणैकधु

राम:
५५

रावेकधुरावहे१॥ सतुसर्व्वधुरीणःस्याद्योवैसर्व्वधुरावहः२॥ माहेयीसौरभेयीगौरुस्रामाता
चशृङ्गिणी॥ अर्ज्जुन्यऽघ्न्यारोहिणीस्यादुत्तमागोषुनैचिकी॥ वर्णादिभेदात्संज्ञाःस्युःशव
लीधवलादयः१॥ द्विहायनीद्विवर्षागौरेकाब्दात्वेकहायनी२॥ चतुरब्दाचतुर्हायण्येवंत्र्यब्दा
त्रिहायणी१॥ वशावन्ध्याऽवतोकातुस्रवद्गर्भाऽथसंधिनी॥ आक्रान्तावृषभेणाऽथवेहद्ग
र्भोपघातिनी२॥ काल्योपसर्य्याप्रजने२प्रष्ठौहीबालगर्भिणी॥ स्यादचण्डीतुसुकरा२बहुसू
तिःपरेष्टुका२॥ चिरसूतावष्कयणी२धेनुःस्यान्नवसूतिका२॥ सुव्रतासुखसंदोह्या२पीनोध्नी
पीवरस्तनी२॥ द्रोणक्षीराद्रोणदुग्धा२धेनुष्यावन्धकेस्थिता२॥ समांसमीनासायैवप्रतिवर्षंप्र
सूयते१॥ ऊधस्तुक्लीबमापीनं२समौशिवककीलकौ२॥ नपुंसिदामसंदानं२पशुरज्जुस्तुदामनी२॥
वैशाखमन्थमन्थानमन्थानोमन्थदण्डके१॥ कुठरोदण्डविष्कंभो२मंथनीगर्गरीसमे२॥ उष्ट्रेक

अमः
५६

मेलकंमयमहाङ्गाः४करभःशिशुः१॥करभाःस्युःशृंखलकादारवैःपादबंन्धनैः१॥अजाछागीश
शुभछागबस्तछगलकाअजेप॥मेढ्रोरभोरणोर्णायुमेषवृष्णयएलके७॥उष्ट्रोरभ्राजधं
स्यादोष्ठ्रकौरभ्रकाजकं१॥चक्रीवन्तस्तुवालेयारासभागर्दभाःखराप॥वैदेहकःसार्थवाहो
नैगमोवाणिजोवणिक्७॥पण्याजीवीविपणिकःक्रयविक्रयिकश्चसः३॥विक्रेतास्याद्विक्र
यिकः२क्रायकःक्रयिकःसमौ२॥वाणिज्यंतुवणिज्यास्यात्मूल्यंवस्नोप्यवक्रयः३॥नीवीप
रिपणोमूलधनं३लाभोऽधिकंफलं३॥प्रतिदानंपरीवर्तोनैमेयनिमयावपि४॥पुमानुपनि
धिर्न्यासः२प्रतिदानंतदर्पणं२॥क्रयेप्रसारितंक्रय्यंक्रेयंक्रेतव्यमात्रके१॥विक्रेयंपणितव्यं
चपण्यं३क्रय्यादयस्त्रिषु॥क्लीबेसत्यापनंसत्यंकारःसत्याकृतिःस्त्रियां३॥विपणोविक्रयः२
संख्याःसंख्येयेह्यादशत्रिषु॥विंशत्याद्याःसदैकत्वेसर्वाःसंख्येयसंख्ययोः॥संख्यार्थेद्विबहु

राम
५६

एकंदशशतंसहस्रायुतलक्षप्रयुतकोटयः क्रमसः ख्वर्बुदमब्जखर्वमहापद्मशंकवस्तस्मात् जलधिश्चांत्यंमध्यंपरार्द्धमिति दशोत्तरंसंज्ञाः॥१

त्वेरत्त्रस्त्रासु चानवृतेः स्त्रियः॥ पर्क्कैः सैतत सहस्राद्दिक्रमाद्दशगुणोत्तरं॥ पौतवं द्रुवयं पाय्यमि
तिमानार्थकं त्रयं॥ मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषकः॥१॥ ते षोडशाक्षः कर्षोऽ
स्त्रीश पलं कर्षचतुष्टयं॥२॥ सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले॥ तुला स्त्रियां पलशतं
भारः स्याद्विंशतिस्तुलाः॥ आचितं दश भाराः स्युः शाकटो भार आचितः॥२॥ कार्षापणः कार्षि
कः स्यात्कार्षिके ताम्रिके पणः॥२॥ अस्त्रियामाढकद्रोणौ खारी वाहो निकुंचकः॥ कुडवः प्रस्थ
इत्याद्याः परिमाणार्थकाः पृथक्॥३॥ पादस्तुरीयो भागः स्यादंशभागौ तु वण्टकः॥३॥ द्रव्यं वित्तं स्वा
पतेयं रिक्थमृक्थं धनं वसु॥ हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि॥३॥ स्यात्कोशश्च हिरण्यं च
हेमरूप्ये कृताकृते॥ ताभ्यां यदन्यत्तत्कुप्यं रूप्यं तद्द्वयमाहतं॥ गारुत्मतं मरकतमश्मगर्भो ह
रिन्मणिः॥४॥ शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकं॥ मुक्ताथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकं॥

पलं प्रकुंचकं मुष्टिः कुडवं तच्चतुष्टयं चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकं अष्टाढको भवेद्द्रोणो द्विद्रोणः सूर्य उच्यते सार्द्धसूर्यो
भवेत्खारी द्विसूर्यो गोणसंज्ञिता तामेव भारं जानीयाद्वाहो भारचतुष्टयं शुष्कमेयेत्विदं मानं द्विगुणं तद्द्रवेषु तः ५

ख्रमः ५७ रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि च ॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकं ॥ तपनीयं शातकुंभं
गांगेयं भर्म्म कर्वुरं ॥ चामीकरं जातरूपं महारजतकांचने ॥ रुक्मं कार्त्तस्वरं जाम्बुनदमष्टापदोऽस्त्रि
यां ॥ अलंकारसुवर्णं यच्छृंगीकनकमित्यदः ॥ दुर्वर्णं रजतं रूप्यं खर्ज्जुरं श्वेतमित्यपि ॥ रीतिः स्त्रि
यामारकूटो न स्त्रियामथ ताम्रकं ॥ शुल्वं म्लेछमुखं द्व्यष्टवरिष्टोदुम्बराणि च ॥ लोहोऽस्त्री शस्त्रकं
तीक्ष्णं पिंडं कालायसायसी ॥ अश्मसारोऽथ मंडूरं सिंहाणमपि तन्मले ॥ [illegible] सर्वं च तैजसं
लोहं विकारस्त्वयसः कुशी ॥ क्षारः काचोऽथ चपलो रसः सूतश्च पारदे ॥ गवलं माहिषं शृंग
मभ्रकं गिरिजामले ॥ स्रोतोंजनं तु सौवीरं कापोतांजनयामुने ॥ तुत्थांजनं शिखिग्रीवं वितुन्नकम
यूरकं ॥ कर्परी दार्व्विकाक्काथोद्भवं तुत्थं रसांजनं ॥ रसगर्भं तार्क्ष्यशैलं गंधाश्मनि तु गंधकः ॥ सौगं रामः
धिकश्च चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥ रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमांजनं ॥ पिंजरं पी ५७

त्रिवीजःकर्पासः२

तनंतालमालञ्चहरितालके ४॥ गैरेयमर्थ्यंङ्गिरिजमश्मजञ्चशिलाजतुप॥ वोलगन्धरसप्राणपिण्ड
गोपरसास्समाः ६॥ डिण्डीरोऽब्धिकफः फेनः ३ सिन्दूरंन्नागसंभवं २॥ नागसीसकयोगेष्टवप्राणि
त्वपुपिच्चटं ६॥ रङ्गवङ्गे २ अथपिचुस्तूलोऽथकमलोत्तरं॥ स्यात्कुसुंभंवह्निशिखम्महारजनमि
त्यपि ४॥ मेषकम्बलऊर्णायुः २ शशोर्णंशशलोमनि २॥ मधुक्षौद्रंमाक्षिकादि ३ मधूच्छिष्टन्तुसि
क्थकं २॥ मनःशिलामनोगुप्तामनोह्वानागजिह्विका ४॥ नैपालीकुनठीगोला ३ यवक्षारोयवा
ग्रजः॥ पाक्योऽथसर्जिकाक्षारःकापोतःसुखवर्च्चकः ३॥ सौवर्च्चलंस्याद्रुचकं २ त्वक्क्षीरीवंशलो
चना २॥ शिग्रुजंश्वेतमरिचं २ मोरटम्मूलमैक्षवं॥ ग्रन्थिकंपिप्पलीमूलंचटिकाशिरइत्यपि ६॥
गोलोमीभूतकेशोनाः २ पत्राङ्गंरक्तचन्दनं २॥ त्रिकटुत्र्यूषणंव्योषं ३ त्रिफलातुफलत्रिकं २॥ वैश्य
वर्गः॥ शूद्राश्चावरवर्णाश्चवृषलाश्चजघन्यजाः ४॥ आचाण्डालात्तुसङ्कीर्णाअम्बष्ठकरणा

अमः स्यः१।। शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः२।। शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रिया
५८ विशोः१।। माहिष्योर्य्याक्षत्रिययोः२क्षत्तार्य्याशूद्रयोः सुतः१।। ब्राह्मण्यां क्षत्रियात्सूत२स्तस्यां वै
देहको विशः२।। रथकारस्तु माहिष्यात्करण्यां यस्य संभवः१।। स्याच्चंडालस्तु जनितो ब्राह्मण्यां वृ
षलेन यः१।। कारुः शिल्पी२ संहतैस्तै द्वयोः श्रेणिः सजातिभिः१।। कुलकः स्यात्कुलश्रेष्ठी२ मालाका
रस्तु मालिकः२।। कुंभकारः कुलालः स्यात्पलगंडस्तु लेपकः२।। नाडिंधमः तन्त्वायः कुविंदः
स्यात्तुंनवायस्तु सौचिकः२।। रंगाजीवश्चित्रकरः२ शस्त्रमार्गोसिधावकः२।। पादूकृच्चर्म्मकारस्यात्
व्योकारो लोहकारकः२।। नाडिंधमः स्वर्णकारः कलादो रुक्मकारके४।। स्याच्छांखिकः काम्बविकः२
शौल्विकस्ताम्रकुट्टकः२।। तक्षा तु वर्द्धकिस्त्वष्टा२ रथकारस्तु काष्ठतट्२।। ग्रामाधीनो ग्रामतक्षः१ कौ रामः
टतक्षोऽनधीनकः१।। क्षुरिमुंडिदिवाकीर्त्तिनापितान्तावसायिनः५।। निर्णेजकः स्याद्रजकः शौ ५८

ण्डिको मण्डहारकः २॥ जाबालः स्यादजाजीवो देवाजीवस्तु देवलः २॥ स्यान्माया शाम्बरी मायाका
रस्तु प्रातिहारिकः २॥ शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ॥ भरता इत्यपि नटाश्चा
रणास्तु कुशीलवाः २॥ मार्द्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः २॥ वेणुध्माः स्युर्वैणा
विकाः वीणावादास्तु वैणिकाः २॥ जीवान्तकः शाकुनिको द्वौ वागुरिकजालिकौ २॥ वैतंशि
कः कौटिकश्च मांसिकश्च समं त्रयं २॥ भृतको भृतिभुक् कर्म्मकरो वैतनिकोपि सः ४॥ वार्त्तावहो
वैवधिको भारवाहस्तु भारिकः २॥ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ॥ निहीनोऽपसदो
जाल्मः क्षुल्लकश्चेतरश्च सः १०॥ भृत्ये दासेरदासेयदासगोप्यकचेटकाः ॥ नियोज्यकिङ्करप्रैष्यभु
जिष्यपरिचारकाः ११॥ पराचितपरिस्कन्दपरजातपरैधिताः ४॥ मन्दस्तुन्दपरिमृजः आलस्यः
शीतकोऽलसोऽनुष्णः ६ दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ॥ चण्डालप्लवमातङ्गदिवाकि

अमः
५९

र्त्तिजनङ्गमाः॥निषादश्वपचावंतेवासिचांडालपुकसाः२०॥भेदाःकिरातशबरपुलिन्दाम्लेछजा
तयः४॥व्याधोमृगवधाजीवोमृगयुर्लुब्धकोऽपिसः४॥कौलेयकःसारमेयःकुक्कुरोमृगदंशकः
॥शुनकोभषकःश्वास्यादलर्कस्तुसयोगितः२॥श्वाविश्वकद्रुर्मृगयाकुशलःसरमाशुनी२॥
विट्चरःशूकरोग्राम्योवर्करस्तरुणःपशुः२॥आछोदनंमृगव्यंस्यादाखेटोमृगयास्त्रियां४॥द
क्षिणारुर्लुब्धयोगाद्दक्षिणेर्म्माकुरङ्गकः२॥चौरैकागारिकस्तेनदस्युतस्करमोषकाः॥प्रतिरोधिपरा
स्कंदिपाटच्चरमलिम्लुचाः१०॥चौरिकास्तैन्यचौर्येचस्तेयंलोप्त्रंतुतद्धनं४॥वीतंसस्तूपकरणं
बन्धनेमृगपक्षिणां॥उन्माथःकूटयंत्रंस्याद्वागुरामृगबंधनी२॥शुल्बंवराटकःस्त्रीतुरज्जु
स्त्रिषुवटीगुणः४॥उद्घाटनंघटीयंत्रंसलिलोद्वाहनंप्रहेः३॥पुंसिवेमावायदण्डःसूत्राणिपुंसि
तन्तवः२॥वाणिर्व्यूतिःस्त्रियौतुल्येपुस्तंलेप्यादिकर्म्मणि१॥पञ्चालिकापुत्रिकास्याद्वस्त्रदंतादि

रामः
५९

भिः कृतार ॥ पिटकः पेटकः पेटा मञ्जूषाऽथ विहङ्गिका ॥ भारयष्टिस्तदालम्बि शिक्यंका
चोऽथ पादुका ॥ पादूरुपानत्स्त्री सैवाऽनुपदीना पदायता ४ ॥ नध्री वध्री वरत्रा स्यादश्वा
देस्ताडनी कशार ॥ चंण्डालिका तु कण्डोलवीणा चाण्डालवल्लकी ३ ॥ नाराची स्यादेषणिकार
शाणास्तु निकषः कषः ३ ॥ व्रश्चनः पत्रपरशुरीषीका तूलिका समेर ॥ तैजसावर्त्तनी मूषा भ
स्त्रा चर्म्मप्रसेदिकार ॥ आस्फोटनी वेधनिका कृपाणी कर्त्तिका समेर ॥ वृक्षादनो वृक्षभेदिर
टङ्कः पाषाणदारणाः२ ॥ क्रकचोऽस्त्री करपत्रं स्यादारा चर्म्मप्रभेदिकार ॥ सूर्म्मी स्थू[illegible]णा लोह
प्रतिमा३ शिल्पं कर्म्मकलादिकं१ ॥ प्रतिमानं प्रतिविम्बं प्रतिमा प्रतियातना ॥ प्रतिच्छाया प्रतिकृ
तिरर्च्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात२ ॥ वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृ
क् ॥ साधारणः समानश्च स्युरुत्तरपदे त्वमी ॥ निभसंकाशनीकाशप्रतीकाशोपमादयः५ ॥ कर्म्म

अमः
६०

ष्या तु निधा भृत्या भृतयो भर्म्म वेतनं॥ भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि॥१॥ सुरा हलिप्रि
या हाला परिस्रुद्वरुणात्मजा॥ गन्धोत्तमा प्रसन्नेरा कादम्बर्य्यः परिस्रुता॥ मदिरा कश्यमद्ये चा
प्यु२ वदंशस्तु भक्षणं॥ शुण्डा पानमदस्थानं२ मधुवारा मधुक्रमाः२॥ मध्वासवो माधवको म
धु माध्वीकमद्वयोः॥ मैरेयमासवः सीधु२ र्मेदको जगलः समौ२॥ सन्धानं स्यादभिषवः२ किण्वं
पुंसि तु नग्नहूः२॥ कारोत्तरः सुरामण्ड२ आपानम्पानगोष्ठिका२॥ चषकोऽस्त्री पानपात्रं२ सरकोप्य
नुतर्षणं२॥ धूर्त्तोऽक्षदेवी कितवोऽक्षधूर्त्तो द्यूतकृत्समाः५॥ स्युर्ल्लग्नकाः प्रतिभुवः२ सभिका द्यूत
कारकाः२॥ द्यूतोऽस्त्रीयामक्षवती कैतवं पण इत्यपि४॥ पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाश
काश्च ते३ परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियां॥ अष्टापदं शारिफलं२ प्राणिद्यूतं स
माह्वयः२॥ ॥॥ शूद्रवर्गः ॥॥ उक्ता भूरिप्रयोगत्वादेकस्मिन्ये त्र यौगिकाः॥ तद्धर्म्माद न्यतो

रामः
६०

विशेष्याणां प्रधानानां सैः   हेतुः साध्य कृत्येष्वपि साधनपरस्य ३   श्रीणि सभाग्यस्य २   हेमहाभिलाषस्य २   स्वर्गादिवर्गीया अपि ये ते

द्त्ता वृहद्भ्यां लिङ्गान्तरेष्वपि नो ॥११॥ ॥ इत्यमरसिंहकृतौ नामलिङ्गानुशासने भूकाण्डो नाम द्वितीयः सा
ङ्ग एव समर्थितः॥ ॥ शुभमस्तु॥ ॥ विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि। लिङ्गादिसंग्रहैर्व
र्गाः सामान्ये वर्गसंश्रयाः॥१॥ स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः॥ गुणद्रव्यक्रियाशब्दा
स्तथा स्युस्तस्य भेदकाः॥२॥ सुकृती पुण्यवान्धन्यो ३ महेच्छस्तु महाशयः २॥ हृदयालुः सुहृदयो
महोत्साहो महोद्यमः॥ प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः॥ वैज्ञानिकः कृतमुखः कृ
ती कुशल इत्यपि २०॥ पूज्यः प्रतीक्ष्यः २ सांशयिकः संशयापन्नमानसः २॥ दक्षिणीयो दक्षिणार्हस्त
त्र दक्षिण्य इत्यपि ३॥ स्याद्वदान्यः स्थूललक्ष्यदानशौण्डा बहुप्रदे ४॥ जैवातृकः स्यादायुष्मान २ न्तर्वा
णिस्तु शास्त्रवित् २॥ परीक्षकः कारणिको २ वरदस्तु समर्धुकः २॥ हर्षमाणो विकुर्वाणः प्रमना हृ
ष्टमानसः ४॥ दुर्मना विमना अन्तर्मनाः ३ स्यादुत्क उन्मनाः २॥ दक्षिणे सरलोदारौ ३ सुकलो दा

वृत्तार्यतिरक्तः ६ हड्या २ एकमतिसंपन्नस्य २ विशेष्यनिघ्नवर्गः ५ द्वेलक्षस्य २

अमः ६१

न्दभोक्तरि ॥ तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः ३ ॥ प्रतीते प्रथितख्यातवित्तविज्ञातवि
श्रुताः ६ ॥ गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ ३ ॥ इभ्य आढ्यो धनी ३ स्वामी त्वीश्वरः पतिरी
शिता ॥ अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः १० ॥ अधिकर्द्धिः समृद्धः स्यात्कुटुम्बव्या
पृतस्तु यः २ ॥ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयं २ ॥ वराङ्गरूपोपेतो यः सिंहसंहननो
हि सः २ ॥ निर्वार्यः कार्यकर्त्ता यः संपन्नः सत्वसंपदा ॥ अवाचि मूकोऽथ मनोजवसः पितृस
न्निभः २ ॥ सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः १ ॥ लक्ष्मीवान्लक्ष्मणः श्रीलः श्रीमान् ४ स्निग्ध
स्तु वत्सलः २ ॥ स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ४ ॥ स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो नि
रवग्रहः ५ ॥ परतन्त्रः पराधीनः परवान्नाथवानपि ॥ अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्य
सौ २ ॥ खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः २ ॥ जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रि

४ एकमंदक्रियस्य

राम ६१

द्वेपितृसमस्य २ पंचाधीनसामान्यस्य ३ द्वेभुवंभार्जयतः २ द्वेउतिविलंबेनक्रियासंपादकस्य ३

यासुयः १॥ कर्म्मक्षमोऽलङ्कर्म्मीणः १ क्रियावान्कर्म्मसूद्यतः १॥ सकार्म्मः कर्म्मशीलोयः २ कर्म्मशूरस्तु क
र्म्मठः २॥ भरण्यभुक्कर्म्मकरः २ कर्म्मकारस्तु तत्क्रियः २॥ अपस्नातो मृतस्नातः २ आमिषाशी तु शौष्कलः
२॥ बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ४॥ परान्नः परपिण्डादो २ भक्षको घस्मरोऽद्मरः ३
आद्यूनः स्यादौदरिको विजिगीषाविवर्ज्जिते ३॥ उभौ त्वात्मम्भरिः कुक्षिम्भरिः स्वोदरपूरके ३॥ स
र्वान्नीनस्तु सर्वान्नभोजी २ गृध्नुस्तु गर्द्धनः॥ लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ ६॥ सो
न्मादस्तून्मदिष्णुः स्यादः २ऽविनीतः समुद्धतः २॥ मत्ते शौण्डोत्कटक्षीबाः ४ कामुके कमिताऽनुकः॥
कम्रः कामयिताभीकः कमनः कामनोऽभिकः॥ विधेयो विनयग्राही वचनेस्थित आश्रवः ४॥ वश्यः प्र
णेयो २ निभृतविनीतप्रश्रिताः समाः ३॥ धृष्टे धृष्णुक् वियातश्च ३ प्रगल्भः प्रतिभान्विते २ स्यादधृष्टे
तु शालीनो २ विलक्षो विस्मयान्वितः २॥ अधीरे कातरस्त्रस्ते भीरुभीरुकभीलुकाः ४॥ आशंसुराशं

ख॰म ग्रसितरि २ ग्रहयालुर्ग्गृहीतरि ॥ श्रद्धालुः श्रद्धायुक्ते १ पतयालुस्तु पातुके २ ॥ लज्जाशीलेऽपत्रपिष्णुर्
६२ र्वन्दारुरभिवादके २ ॥ शरारुर्घातुको हिंस्रः ३ स्याद्वर्द्धिष्णुस्तु वर्द्धनः २ ॥ उत्पतिष्णुस्तूत्पतिता २ ऽलङ्क
रिष्णुस्तु मण्डनः २ ॥ भूष्णुर्भविष्णुर्भविता ३ वर्त्तिष्णुर्वर्तनः समौ २ ॥ निराकरिष्णुः क्षिप्नुः स्यात्
सान्द्रस्निग्धस्तु मेदुरः २ ॥ ज्ञाता तु विदुरो विन्दु ३ र्विकाशी तु विकस्वरः २ ॥ विसृत्वरो विसृमरः प्रसा
री च विसारिणी ४ ॥ सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ६ ॥ क्रोधनोऽमर्षणः कोपी ३ चण्डस्त्व
त्यन्तकोपनः ॥ १ ॥ जागरूको जागरिता २ घूर्णितः प्रचलायितः २ ॥ स्वप्नक् शयालुर्न्निद्रालुर्न्निद्राणशयितौ
समौ ५ ॥ पराङ्मुखः पराचीनः २ स्यादवाङप्यधोमुखः २ ॥ देवानञ्चति देवद्र्यङ् १ विष्वद्र्यङ् विष्वगञ्चति २
यः सहाञ्चति सध्र्यङ् १ स स तिर्य्यङ् यस्तिरोऽञ्चति ॥ वदो वदावदो वक्ता ३ वागीशो वाक्पतिः समौ २ ॥ रामः
वाचोयुक्तिपटुर्वाग्मी २ वावदूकस्तु वक्तरि २ ॥ स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ४ ॥ दु ६२

र्मुखे मुखराऽबद्धमुखौ ३ श्लक्ष्णः प्रियंवदे २ ॥ लोहलः स्यादस्फुटवाक्गर्ह्यवादी तु कद्वदः २ ॥ समौ कुवाद
कुचरौ २ स्यादसौम्यस्वरोऽस्वरः २ ॥ रवणः शब्दनो २ नान्दीवादी नान्दीकरः समौ २ ॥ जडोऽज्ञः २ एडमू
कस्तु वक्तुं श्रोतुमशिक्षिते २ ॥ तूष्णींशीलस्तु तूष्णीको २ नग्नोऽवासा दिगम्बरः ३ ॥ निष्कासितोऽव
कृष्टः स्याद २ अपध्वस्तस्तु धिक्कृतः २ ॥ आत्तगर्वोऽभिभूतः स्याद्दापितः साधितः समौ २ ॥ अधिक्षिप्तः
प्रतिक्षिप्तो २ बद्धे कीलितसंयतौ ३ ॥ आपन्न आपत्प्राप्तः स्यात् २ कान्दिशीको भयद्रुतः २ ॥ प्रत्यादिष्टो
निरस्तः स्यात्प्रत्याख्यातो निराकृतः ४ ॥ निकृतः स्याद्विप्रकृतो २ विप्रलब्धस्तु वञ्चितः २ ॥ मनोहतः प्र
तिहतः प्रतिबद्धो हतश्च सः ४ ॥ आक्षारितः क्षारितोऽभिशस्ते ३ संकसुकोऽस्थिरे २ ॥ व्यसनार्तोपरक्तौ
द्वौ २ विहस्तव्याकुलौ समौ २ ॥ विक्लवो विह्वलः २ स्यात्तु विवशोऽरिष्टदुष्टधीः २ ॥ कश्यः कशार्हे २ संन
द्धे त्वाततायी वधोद्यते २ ॥ द्वेष्ये त्वक्षिगतो २ वध्यः शीर्षच्छेद्य इमौ समौ २ ॥ विष्यो विषेण यो वध्यो मु

अमः सल्पोमुसलेनयः१॥ शिच्छिदानोकृत्स्न कर्म्मारश्चपलाश्चिकुरः समौ२॥ दोषैकदृक्पुरोभागीर
६३ निकृतस्त्वनृजुःशठः३॥ कर्णेजपः सूचकः स्यात्पिशुनोदुर्ज्जनः खलः५॥ नृशंसोघातुकः क्रूरः
पापो४ धूर्त्तस्तु वञ्चकः२॥ अज्ञेमूढयथाजातमूर्खवैधेयःवालिशाः६॥ कदर्य्यः कृपणःक्षुद्रकिंप
चानमितंपचाः५॥ निस्वस्तुदुर्विधोदीनोदरिद्रोदुर्ग्गतोपिसः५॥ वनीयकोयाचनकोमार्ग्गणोया
चकार्थिनौ५॥ अहंकारवानहंयुः शुभंयुस्तुशुभान्वितः२॥ दिव्योपपादुकादेवा१ नृगवाद्याजरा
युजाः१॥ स्वेदजाः कृमिदंशाद्याः२ पक्षिसर्प्पादयोऽण्डजाः२॥ उद्भिदस्तरुगुल्माद्याः१ उद्भिदुद्भिज्जमु
द्भिदं३॥ सुन्दरंरुचिरंचारुसुषमंसाधुशोभनं॥ कान्तम्मनोहरंरुच्यम्मनोज्ञम्मञ्जुमञ्जुलं१२॥ तदासेच
नकंतृप्तेर्न्नास्त्यन्तोयस्यदर्शनात्१॥ अभीष्टेऽभीप्सितंहृद्यंदयितम्वल्लभंप्रियं६॥ निकृष्टप्रतिकृष्टार्घ रामः
रेफयाप्याऽवमाऽधमाः॥ कुपूयकुत्सिताऽवद्यखेटगर्ह्याऽणकाः समाः१३॥ मलीमसन्तुमलिनंकच्चरं ६३

म्मलदूषितं४॥ पूतंपवित्रंम्मेध्यंच्चवीध्रंतुविमलार्थकं५॥ निर्णिक्तंशोधितंम्मृष्टंनिःशोध्यमनवस्करं६
॥असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके४॥ क्लीबेप्रधानंप्रमुखप्रवेकाऽनुत्तमोत्तमाः॥ मुख्यवर्य्यवरे
ण्याश्चप्रवर्होऽनवरार्द्ध्यवत्॥ परार्द्ध्याग्र्यप्राग्रहरप्राग्र्याऽग्र्यीयमग्रियं७॥ श्रेयान्श्रेष्ठःपुष्कलःस्यात्स
त्तमश्चातिशोभने॥ स्युरुत्तरपदेव्याघ्रपुंगववर्षभकुंजराः॥ सिंहशार्द्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराः७
अप्राग्र्यंद्वयहीनेद्वेअप्रधानोपसर्ज्जने८॥ विशंकटंपृथुबृहद्विशालंपृथुलंमहत्॥ वड्रोरुविपुलंपी
नपीव्नीतुस्थूलपीवरे९॥ स्तोकाल्पक्षुल्लकाःसूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु२॥ स्त्रियाम्मात्रात्रुटिःपुंसिल
वलेशकणाणवः१॥ अत्यल्पेऽल्पिष्ठमल्पीयःकनीयोऽणीयइत्यपि॥ प्रभूतंप्रचुरंप्राज्यमदभ्रं
बहुलंबहु॥ पुरुहंपुरुभूयिष्ठंस्फिरंभूयश्चभूरिच२॥ परःशताद्यास्तेयेषाम्परासंख्याशतादिकात्॥
गणनीयंतुगणेयंसंख्यातेगणितंऽथसमंसर्वं॥ विश्वमशेषंकृत्स्नंसमस्तनिखिलाखिलानिनिःशेषं॥ स
मग्रंसकलंपूर्णमखण्डंस्यादनूनके१३॥ घनंनिरन्तरंसान्द्रंपेलवंविरलंतनु३॥ समीपेनिकटासन्न

खाद्येनपरःसाहस्त्रीर खिला

२प्रि॰ सन्निकृष्टसनीडवत्॥ सदेशाऽभ्याससविधसमर्यादसवेशवत् उपकण्ठान्तिकाऽभ्यर्णाऽभ्यग्रा
६४ अप्यभितोऽव्ययं॥ संसक्ते त्वव्यवहितं मपदान्तरमित्यपि॥ नेदिष्ठमन्तिकतमं स्याद्दूरं वि
प्रकृष्टकं॥ दवीयश्च दविष्ठं च सुदूरं दीर्घमायतं॥ वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतं॥
उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेऽथ वामने॥ न्यङ्नीचखर्वह्रस्वाः स्युरवा
ग्रेऽवनतानतं॥ अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतं॥ आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमि
त्यपि॥ ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ॥ शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः॥
स्थास्नुः स्थिरतरः स्थेयानेकरूपतया तु यः॥ कालव्यापी स कूटस्थः स्थावरो जङ्गमेतरः॥ चरिष्णुज
ङ्गमचरं त्रसमिङ्गं चराचरं॥ चलनं कम्पनं कम्प्रं चलं लोलं चलाचलं॥ चञ्चलं तरलं चैव पारि
प्लवपरिप्लवे॥ अतिरिक्तः समधिको दृढसन्धिस्तु संहतः॥ कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढं॥ ज रामः
रठं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितं॥ पुराणे प्रतनप्रत्नपुरातनचिरन्तनाः॥ प्रत्यग्रोऽभिनवो नव्यो न ६४

कर्कशं। कर्कशमित्यपि

वीनोनूतनोनवः॥ नूत्नश्चसुकुमारंतुकोमलंमृदुलंमृदु४॥ अन्वगन्वक्षमनुगेऽनुपदंक्लीब
मव्ययं४॥ प्रत्यक्षंस्यादैंद्रियकमप्रत्यक्षमतींद्रियं२॥ एकतानोऽनन्यवृत्तिरेकाग्रैकायनाव
पि॥ अप्येकसर्गएकाग्रोप्येकायनगतोपिच७॥ पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याअथास्त्रियां॥
अंतोजघन्यंचरममंत्यपाश्चात्यपश्चिमं६॥ मोघंनिरर्थकं२स्पष्टंस्फुटंप्रव्यक्तमुल्बणं४॥
साधारणंतुसामान्यं२एकाकीत्वेकएककः३॥ भिन्नार्थकाअन्यतरएकस्त्वोन्येतरावपि४॥ उच्चाव
चंनैकभेदं२मुच्चंडमविलंबितं२॥ अरुंतुदस्तुमर्मस्पृक्२अबाधंतुनिरर्गलं२॥ प्रसव्यंप्रतिकूलं
स्यादपसव्यमपष्टुच४॥ वामंशरीरेसव्यंस्यादपसव्यंतुदक्षिणं॥ संकटंनातुसंबाधः२क
लिलंगहनंसमे२॥ संकीर्णेसंकुलाकीर्णे३मुंडितंपरिवापितं२॥ ग्रथितंसंदितंदृब्धं३विसृतंविस्तृ
तंततं३॥ अंतर्गतंविस्मृतंस्यात्प्राप्तप्रणिहितेसमे२॥ वेल्लितप्रेंखिताधूतचलिताकंपितधुते
६॥ नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताःसमाः७॥ परिक्षिप्तंतुनिवृतं२मुषितंमुषितार्थकं२॥ प्र

देवीरतस्य

तिरस्तो

अम: छद्मप्रसृते २ न्यस्तनिसृष्टे २ गुणिताहते २ ॥ निदिग्धोपचिते २ गूढगुप्ते २ गुण्डितरूषिते २ ॥ द्रुतावदीर्णे
६५ उद्गूर्णोद्यते २ काचितशिक्यिते २ ॥ घ्राणघ्राते २ दिग्धलिप्ते २ समुदक्तोद्धृते समे २ ॥ वेष्टितं स्यादु
द्वेष्टितं संवीतं रुद्धमावृतं ५ ॥ रुग्णं भुग्ने २ ऽथ निशितक्ष्णुतशातानि तेजिते ४ ॥ स्याद्विनाशोन्मुखं
पक्वं २ ह्रीणह्रीतौ तु लज्जिते ३ ॥ वृत्ते तु वृत्तव्यावृत्तौ ३ संयोजित उपाहितः २ ॥ प्राप्यं गम्यं समासाद्यं ३ स्य
न्नं रीणं स्नुतं स्रुतं ४ ॥ सङ्गूढः स्यात्संकलितो २ ऽवगीतः ख्यातगर्हणः २ ॥ विविधः स्याद्बहुविधो नाना
रूपः पृथग्विधः ४ ॥ अवरीणो धिक्कृतस्त्वपध्वस्तोऽवचूर्णितः २ ॥ अनायासकृतं फाण्टं स्वनि
तं ध्वनितं समे २ ॥ बद्धे संदानितं मूतमुद्दितं संदितं सितं ६ ॥ निष्पक्वे क्वथितं २ पाके क्षीराज्यहविषां शृतं । हविरा४
निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतेऽनिले १ ॥ पक्वं परिणते २ गूनं हन्ने १ मीढं तु मूत्रिते १ ॥ पुष्टे तु
पुषितं २ सोढे क्षान्तं २ उद्वान्तमुद्गते २ ॥ दान्तस्तु दमिते २ शान्तः शमिते २ प्रार्थितेऽर्दितः २ ॥ ज्ञप्तस्तु ज्ञपिते २ राम
छन्नश्छादिते २ पूजितेऽञ्चितः २ ॥ पूर्णस्तु पूरिते २ क्लिष्टः क्लिशिते २ ऽवसिते सितः २ ॥ प्रुष्टप्लुष्टोषिता ६५

द्वे वमितवान्तकस्य २ द्वे परिणामं प्रापितस्य २ द्वे गुदनिष्काशितपुरीषस्य २ द्वे उपस्थनिष्काशितमूत्रस्य २ द्वे यस्य पोषणं कृतं तस्य २

दग्धे [?] तष्टं त्वष्टं तनूकृते ३ || वेधितच्छिद्रितौ विद्धे ३ विन्नवित्तौ विचारिते ३ || निःप्रभे विगतारोकौ
विलीने द्रुतविद्रुतौ ३ || सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ३ || ऊतं स्यूतमुतं चेति त्रि
तयं तन्तुसन्तते ४ || स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितं ६ || वरिवसिते वरिवस्यि
तमुपासितं चोपचरितं च ४ || संतापितसंतप्तौ धूपितधूपायितौ च दूनश्च ५ || हृष्टे मत्तस्तृ
प्तः प्रह्लन्नः प्रमुदितः प्रीतः ६ || छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णं ८ || स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं
पन्नं च्युतं गलितं ७ || लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ६ || अन्वेषितं गवेषितमन्विष्ट
म्मार्गितं मृगितं ५ || आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ७ || त्रातं त्राणं रक्षितमवितं
गोपायितं च गुप्तं ६ || अवगणितमवमतावज्ञातेऽवमानितं च परिभूते ५ || त्यक्तं हीनं विधुतं समु
ज्झितं धूतमुत्सृष्टं ६ || उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितं ७ || बुद्धं बुधितम्म
नितं विदितं प्रतिपन्नमवसितावगते ७ || ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातं

=साधिष्ठादीनां बाढादिभिर्यथासंख्यं बोध्यम् ६ क्षेपिष्ठादीनां क्षिप्रादिभिर्यथासंख्यं ज्ञेयम् ५

श्रमः सङ्कीर्ण्णविदितसंश्रुतं समाहितोपगतं ११ ॥ ईलितशस्तमनायितपणायितप्रणुतपणितपनितानि
६६ ॥ अपिगीर्ण्णवर्णिताऽभिष्टुतेडितानिस्तुतार्थानि १२ ॥ भक्षितचर्वितलिप्तप्रत्यवसितगि-
लितखादितप्सातं ॥ अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते १४ ॥ क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबं-
हिष्ठाः ॥ क्षिप्रक्षुद्राऽभीप्सितपृथुपीवरबहुप्रकर्षार्थाः १५ ॥ साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्र-
सिष्ठवृन्दिष्ठाः ॥ बाढव्यायतबहुगुरुवामनवृन्दारकातिशये १६ ॥ ॥ विशेष्यनिघ्नवर्गः ॥ ॥ प्रकृति-
प्रत्ययार्थाद्यैः सङ्कीर्णे लिङ्गमुन्नयेत् ॥ कर्म्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः १ ॥ साकल्या-
सङ्गवचने पारायणपरायणे २ ॥ यदृच्छा स्वैरिता हेतुशून्या त्वास्या विलक्षणं ५ ॥ शमथस्तु शमः शां-
तिर्द्दान्तिस्तु दमथो दमः ३ ॥ अवदानं कर्म्मवृत्तं काम्यदानं प्रवारणं २ ॥ वशक्रिया संवननं
मूलकर्म्म तु कार्म्मणं २ ॥ विधूननं विधुवनं तर्प्पणं प्रीणनावनं ३ ॥ पर्य्याप्तिः स्यात्परित्राणं रामः
हस्तवारणमित्यपि ३ ॥ सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ३ ॥ आक्रोशनमभिषङ्गः २ ६६

द्वे वशीकरणस्य २ द्वे कंपनस्य २ त्रीणि कामक्रोधाद्यभावतपक्लेशसहनयोः ४ द्वे प्रशस्तकर्म्मणः ३
द्वे क्रियायाः ... नैरंतर्येण क्रियायाः क्रियावतश्च ५ द्वे कामदृष्टिख्यातस्य ... त्रीणि आलिंगनकुशलप्रश्नादिना नंदनस्य ... त्रीणि मारणोद्यतनिवारणस्य २

५ द्वे स्फुरणस्य द्वे प्रमाणस्य ५ द्वे प्रसवनस्य प्रस्रवणस्य वा ५ द्वे क्लमस्य ५ द्वे ग्लानेः ५ द्वे संधानस्य ५

द्वे वेधनस्य२ द्वे पचनस्य३ द्वे अनुभवस्य२ द्वे सर्वतोव्याप्तेः द्वे आह्वानस्य२ रितेः५ द्वे गुरुपरंपरागतसदुपदेशस्य२

सम्वेदो वेदना न ना२॥ सम्मूर्छनमभिव्याप्ति२र्याच्ञाभिशस्तिरर्थना१दने४॥ वर्द्धनं छेदने२ऽथद्वे आ
नन्दनसभाजने॥ आप्रच्छन्नम३थाम्नायः संप्रदायः२ क्षये क्षिया२॥ ग्रहे ग्राहो२ वशः कान्तौ२ र
क्षणस्त्राणे२ रणः क्वणे२॥ व्यधो वेधे२ पचा पाके२ हवो हूतौ२॥ उषः प्लोषे२ नयो नाये२ ज्यानिर्जीर्णौ२
भ्रमो भ्रमौ२॥ स्फातिर्वृद्धौ२ प्रथा ख्यातौ२ स्पृष्टिः पृक्तौ२ स्नवः स्रवे२॥ एधा समृद्धौ२ स्फुरणे स्फु
रणा२ प्रमितौ प्रमा२॥ प्रसूतिः प्रसवे२ श्च्योते प्राघारः२ क्लमथः क्लमे२॥ उत्कर्षोऽतिशये२ संधिः श्ले
षे२ विषय आश्रये२॥ क्षिपायां क्षेपणं२ गीर्णिर्गिरौ२ गुरणमुद्यमे२॥ उन्नाय उन्नये२ श्रायः
श्रयणे२ जयने जयः२॥ निगादो निगदे२ मादो मदे२ उद्वेग उद्भ्रमे२॥ विमर्दनं परिमलो२ऽभ्यु
पपत्तिरनुग्रहे२॥ निग्रहस्तद्विरुद्धः स्या२दभियोगस्त्वभिग्रहः२॥ मुष्टिबन्धस्तु संग्राहो२ डिम्बे ड
मरविप्लवौ३॥ बन्धनं प्रसितिश्चारः स्पर्शः२ स्प्रष्टोपतप्तरि२॥ निकारो विप्रकारः स्या२दाका
रस्त्विङ्ग इङ्गितं३॥ परिणामो विकारो२ द्वे समे विकृतिविक्रिये२॥ अपहारस्त्वपचयः२ समाहारः स

द्वे गिलनस्य२ द्वे भारादिउद्यमे द्वे उन्नयनस्य२ द्वे उद्भ्रमनस्य२ द्वे कुंकुमादिमर्द्दनस्य२ द्वे हितसंपादनादि हितनिवारणप्रवृत्तेः द्वे मुष्टिबंधनस्य त्रीणि ग्रामादिकलहनादेः त्रीणि बंधनस्य२

द्वे ग्रहणस्य२ द्वे रक्षणस्य२ द्वे क्वणनस्य२ द्वे शब्दकरस्य२

त्रीणि संतप्तस्य संतापस्य वा२ द्वे अपकारस्य२ त्रीणि अभिप्रायानुरूपचेष्टायाः२ द्वे परिष्कारस्य२ चत्वारि प्रकृतेरन्यथाभावे२ द्वे विषयेभ्य इंद्रियपरावर्तनस्य२ द्वे क्रीडार्थसंचरणस्य२

श्रीणिविधुरस्य४ द्वे संनिहिताश्रयस्य४ द्वे परिजनादिवेष्टितस्य४ द्वे विश्लेषस्य५ द्वे विरोधस्य५ द्वे सर्वतोगमनस्य५ द्वे संक्षेपस्य५ श्रीणि आसनस्य६

द्वे रात्रौ देर्घुत्यानिः सारणस्य२ द्वे सदृशाकरणस्य२ द्वे विच्छेदनजलादिप्रवृत्तेः२ एकं बहिर्गमनस्य२ एकं वर्गादेवबहिर्गमनस्य३ द्वे अभिमुख्येन ग्रहणस्य१ द्वे मारणादिमायायाः द्वे जागरणस्य

प्रमः मुपव्ययः२॥ प्रत्याहार उपादानं२ विहारस्तु परिक्रमः२॥ अभिहारोऽभिग्रहणं२ निर्हारोऽभ्यवक

६७ र्षणं२॥ अनुहारोऽनुकारः स्यादर्थस्यापगमो व्ययः२॥ प्रवाहस्तु प्रवृत्तिः स्यात्२ प्रवहो गम

नं बहिः२॥ वियामो वियमो यामो यमः संयामसंयमौ६॥ हिंसाकर्माभिचारः स्यात्२ जागर्य्या जा

गरा द्वयोः२॥ विघ्नोऽन्तरायः प्रत्यूहः स्यात्३ उपघ्नोऽन्तिकाश्रये२॥ निर्वेश उपभोगः स्यात्२ परिसर्पः प

रिक्रिया२॥ विधुरं तु प्रविश्लेषोऽभिप्रायश्छन्द आशयः३॥ संक्षेपणं समसनं२ पर्य्यवस्था

विरोधनं२॥ परिसर्य्या परीसारः२ स्यादास्या त्वासना स्थितिः३॥ विस्तारो विग्रहो व्यासः३ स च शब्दस्य

१ द्वे धान्यसंचयस्य विस्तरः१॥ स्यान्मर्द्दनं संवाहनं२ विनाशः स्यादद्दर्शनं२॥ संस्तवः स्यात्परिचयः२ प्रसरस्तु विसर्प्पणं२ द्वे प्रसारादिविसर णस्य४

३ द्वे संनिधानस्य ॥ नीवाकस्तु प्रयामः स्यात्२ सन्निधिः सन्निकर्षणं२॥ लवोऽभिलावो लवने३ निष्पावः पवने पवः३॥ प्र

३ श्रीणि ... स्य श्रीणि धानानां व स्तावः स्यादवसरः२ त्रसरः सूत्रवेष्टनं२॥ प्रजनः स्यादुपसरः२ प्रश्रयप्रणयौ समौ२॥ धीशक्तिर्निष्क्रमोऽस्त्री

तु संक्रमो दुर्गसञ्चरः२॥ प्रत्युत्क्रमः प्रयोगार्थः२ प्रक्रमः स्यादुपक्रमः२॥ स्यादभ्यादानमुद्घात आरं राम ६७

फलीकरणस्य२ द्वे प्रसंगस्य द्वे सूत्रवेष्टनक्रियायाः२ द्वे पादाप्रमर्द्दनोदः४ द्वे तिरोधानस्य४

द्वे प्रथमगर्भग्रहणस्य२ द्वे प्रीत्याप्रार्थनस्य२ चत्वारि आलिंगनस्य१ द्वे दुर्गदेशप्रवेशक्रियायाः१ द्वे कर्मारंभे प्रथमप्रयोगस्य२ पंचारंभस्य२

पंचान्वेषणस्य ५

द्वे शीघ्रस्य १ द्वे रोधस्य १ द्वे धीनयनस्य १ द्वे कुंकुमादिनानुलेपनस्य २ द्वे णादिसंगोवियोजनस्य २ द्वे दानस्य २ त्रीणि पार्द्धभावस्य २ त्रीणि क्लेशस्य ३ द्वे तिप्रसिद्धस्य २

भः ३ संभ्रमस्त्वरा २ ॥ प्रतिबन्धः प्रतिष्टंभोऽवनायस्तु निपातनं २ ॥ अत्युत्क्रमः प्रयोगोऽर्थः ४ प्रक्रमः द्वे क्लेशस्य

स्यात्सु उपलंभस्त्वनुभवः समालंभो विलेपनं २ ॥ विप्रलंभो विप्रयोगो विलंभस्त्वतिसर्जनं २ ॥ वि त्रीणि पठनस्य ३

श्रावस्तु प्रतिख्यातिः २ रंगे स्यात्प्रतिजागरः २ ॥ निपाठनिपठौ पाठे ३ तेमस्तेमौ समुन्दने २ ॥ आदीनवाश्रवौ त्रीणि संगमस्य ३

क्लेशे ३ मेलके संगसंगमौ ३ ॥ संवीक्षणं विचयनं मार्गणं मृगणा मृगः ५ ॥ परिरंभः परिष्वंगः संश्लेष उ

पगूहनं ४ ॥ निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणं ५ ॥ प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ४ ॥

उपशायो विशायश्च पर्य्यायशयनार्थकौ २ ॥ अर्तनं च ऋतीया च हृणीया च घृणार्थकाः ४ ॥ स्याद्व्यत्या

यो विपर्य्यासो व्यत्यासश्च विपर्य्ययः ४ ॥ पर्य्ययोऽतिक्रमस्त स्मिन्नतिपात उपात्ययः ४ ॥ प्रेषणं यत्स

माहूय तत्र स्यात्प्रतिशासनं १ ॥ ससंस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनां १ ॥ निधाय तक्ष्यते यत्र काष्ठे काष्ठं

स उद्घनः १ ॥ स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते २ ॥ आविधो विध्यते येन तत्र विष्वक्समे निघः १ ॥ उ

त्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ २ ॥ निगारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु ४ ॥ आरत्यवर

खमः तिविरतयउपरामेथष्ठ्यास्त्रियां॥ निष्ठेवोनिष्ठ्यूतिर्न्निष्ठेवनन्निष्ठीवनमित्यभिन्नानि४॥जवनेजूतिः२
६८ सातिस्त्ववसानं२स्यादथज्वरेजूर्त्तिः२॥ उदजस्तुपशुप्रेरणमकरणिरित्यादयःशापे१॥ गोत्रान्तेभ्य
स्तस्यवृन्दमित्यौपगवकादिकं१॥ आपूपिकंशाष्कुलिकमेवमाद्यमचेतसां॥ माणवानान्तुमाणव्यंस
हायानांसहायता१॥ हल्याहलानांब्राह्मण्यवाडव्येतुद्विजन्मनां२॥ द्वेपर्शुकानांपृष्ठानांपार्श्वंपृष्ठ्यंपा
र्श्वमनुक्रमात्२॥ खलानांखलिनीखल्याप्यथमानुष्यकंनृणां१॥ ग्रामताजनताधूम्यापाशागल्यापृ
थकपृथक॥ अपिसाहस्रकारीषवार्म्मणाथर्वणादिकं॥ ॥ ॥ संकीर्णवर्गः ॥ ॥ नानार्थाःकेपिकान्तादि
अथ कान्ता॥
वर्गेष्वेवात्रकीर्त्तिताः॥ भूरिप्रयोगायेयेषुपर्य्यायेष्वपितेषुते१॥ आकाशेत्रिदिवेनाको२लोकस्तुभुवनेजने२
॥ पद्येयशसिचश्लोकः२शरेखड्गेचसायकः२॥ जंम्बुकौक्रोष्टुवरुणौ२पृथुकौचिपिटार्भकौ२॥ आलोको
दर्शनोद्योतौ२भेरीपटहमानकौ२॥ उत्संगचिह्नयोरंकः२कलंकोंकापवादयोः२॥ तक्षकोनागवर्द्धक्यो२ रम
रर्कःस्फटिकसूर्य्ययोः२ मारुतेवेधसिब्रध्नेपुंसिकःकंशिरोम्बुनोः५॥ स्यात्पुलाकस्तुच्छधान्येसंक्षेपे ६८

भक्तसिक्थके ३॥ उलूके करिणः पुछमूलोपान्ते च पेचकः ३॥ कमंडलौ च करकः २ सुगते च विनायकः १॥
किष्कुर्हस्ते वितस्तौ च २ शूककीटे च वृश्चिकः २॥ प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययं २॥ स्याद्भूतिकं तु
भूनिम्बे कत्तृणे भूस्तृणेपि च ३॥ ज्योत्स्निकायां च घोषे च कोशातकः २ऽथ कफेले॥ सिते च खदिरे सोम
वल्कः स्याद् २ऽथ सिह्लके॥ तिलकल्के च पिण्याकोर २ बाह्लीके रामठेपि च २॥ महेन्द्रगुग्गुलूकव्यालग्राहिपुंकौ
शिकः ४॥ रुक्तापशङ्कास्वातङ्कः ३ स्वल्पेपि क्षुल्लकस्त्रिषु १॥ ~~पीडार्थे~~ जैवातृकः शशाङ्केपि २ खुरेप्यश्वस्य
वर्तकः १॥ व्याघ्रेपि पुण्डरीकोनाग्न्यां वान्यामपि दीपकः २॥ शालाविकाः कपिक्रोष्टुश्वानः ३ स्वर्णेपि गैरि
कं २॥ पीडार्थेपि व्यलीकं स्याद् २ अलीकं त्वप्रियेनृते ३॥ शीलान्वयाववनूके द्वे २ शल्के शकलवल्कले २॥
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले॥ दीनारेपि च निष्कोऽस्त्री रामलैनसोः॥ दम्भेप्य ३ऽथ पिनाको
स्त्री शूलशङ्कुरधन्वनोः २॥ धेनुका तु करेण्वां च २ मेघजाले च कालिका २॥ कारिका यातनावृत्त्योः २ क
र्णिका कर्णभूषणे॥ करिहस्ताङ्गुलौ पद्मबीजकोश्यां ३ त्रिषूत्तरे॥ वृन्दारको रूपिमुख्यान्यकेवलाः ३॥

अम स्याद्दाम्भिके कौक्कुटिको यश्चादूरेरितेक्षणः २ ॥ लालाटिकः प्रभोर्भावदर्शी कार्याक्षमश्च यः २ भूभृ
६९ न्नितम्बवलयचक्रेषु कटकोऽस्त्रियां ३ ॥ सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ३ ॥ ॥ इति कान्ताः ॥ ॥ मयूखस्
त्विट्करज्वालास्व ३ अलिबाणौ शिलीमुखौ ॥ शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्री ३ इन्द्रियेपि खं १ ॥ घृणिज्वाले अ
पि शिखे २ ॥ इति खान्ताः ॥ ॥ शैलवृक्षौ नगावगौ २ आशुगौ वायुविशिखौ २ ॥ शरार्कविहगाः खगाः ३ पतङ्गौ प
क्षिसूर्यौ च २ ॥ पूगः क्रमुकवृन्दयोः २ पशवोपि मृगा वेगः ॥ प्रवाहजवयोरपि २ रागः कौसुमे रेणौ स्नानीयादौ र
जस्यपि ३ ॥ गजेपि नागमातङ्गावपाङ्गस्तिलकेपि च ४ ॥ सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ५ यो
गः सन्नहनोपायध्यानसङ्गतियुक्तिषु ५ ॥ भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ४ ॥ चातके हरिणे
पुंसि सारङ्गः शबले त्रिषु ३ ॥ कपौ च प्लवगः २ शापे त्वभिषङ्गः पराभवे २ ॥ यानाद्यङ्गे युगः पुंसि युगं युग्मे कृता
दिषु ३ ॥ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः १० लिङ्गं चिह्नशेफयोः २ शृ राम
ङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्द्धगुह्ययोः २ ॥ भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ७ ॥ इति गान्ताः ॥ ६९

परिघः परिघातेऽस्त्रेप्योरघो वृन्देंऽभसां रयेर॥ मूल्येपूजाविधावर्घोंऽहोदुःखव्यसनेष्वघं३॥ त्रिषि
ष्टेऽल्पेलघुः२ ॥॥ इति घांताः॥॥ काचाः शिक्यमृद्भेददृग्रुजः३ विपर्य्यासेविस्तरेच प्रपञ्चः२॥ पाव
केशुचिःमास्यमात्येचाऽत्युपधेपुंसिमेध्येसितत्रिषु६॥ अभिषङ्गःस्य छायांचगभस्तौचरुचिः
स्त्रियां३॥ ॥ इति चांताः॥॥ केकितार्क्ष्यावहिभुजौर दन्तविप्राण्डजाद्विजाः३॥ अजाविष्णुहरछागाः३ गो
ष्ठाध्वनिवहाव्रजाः३॥ धर्म्मराजौजिनयमौर कुञ्जोदन्तेपिनस्त्रियां१॥ बलजेक्षेत्रपूर्द्वारेर बलजाव
ल्गुदर्शना१॥ समेक्ष्मांशेरणेप्याजिः२ प्रजास्यात्संततौजनेर॥ अब्जौशङ्खशशाङ्कौचर स्वेकेनित्ये
निजेत्रिषुर ॥॥ इति जांताः॥ ॥॥ पुंस्यात्मनिप्रवीणेतुक्षेत्रज्ञोवाच्यलिङ्गकः२॥ संज्ञास्याच्चेतनानाम
हस्ताद्यैश्चार्थसूचना३॥ दोषज्ञौवैद्यविद्वांसौर ज्ञोविद्वान्सोमजोपिचर॥ ॥ इति ञांताः॥ काकेभ
गण्डौकरटौर गजगण्डकटीकटौर॥ शिपिविष्टस्तुखलतौदुश्चर्म्मणिमहेश्वरे३॥ देवशिल्पिन्यपि
त्वष्टार दिष्टंदैवेपिनद्वयोः२॥ रसेकटुःकट्वकार्य्येत्रिषुमत्सरतीक्ष्णयोः४॥ रिष्टंक्षेमाऽशुभाऽभा

अम: ७०

वेषूरइऽरिष्ठेतुशुभाशुभेर ॥ मायानिश्चलयंत्रेषु कैतवानृतराशिषु ॥ अयोघनेशैलशृंगे सीराङ्गे कू
टमस्त्रियां६ ॥ सूक्ष्मैलायां त्रुटिः स्त्री स्यात्काले ऽल्पे संशयेपि सा७ ॥ अत्युत्कर्षाश्रयः कोट्या३
मूलेलग्नकचे जटा२ ॥ व्युष्टिः फले समृद्धौ च२ दृष्टिर्ज्ञाने ऽक्ष्णि दर्शने३ ॥ इष्टिर्यागेच्छयोः२ सृष्टं
निश्चिते बहुनिश्चिषु२ ॥ कष्टेतु कृच्छ्रगहने२ दक्षा ऽमन्दा ऽगदेषु तु ॥ पटु३ द्वौ वाच्यलिङ्गौ च ॥ ॥ इ
ति टान्ता ॥ ॥ नीलकण्ठः शिवे पि च१ पुंसि कोष्ठो ऽन्तर्जठरं कुशूलो ऽन्तर्गृहं तथा३ ॥ निष्ठा निष्प
त्तिनाशान्ताः३ काष्ठोत्कर्षे स्थितौ दिशि३ ॥ त्रिषु ज्येष्ठो ऽतिशस्तेपि१ कनिष्ठो ऽतियुवाल्पयोः२ ॥ ॥ इ
ति ठान्ता ॥ ॥ दण्डः स्त्री ~~[illegible]~~ वासमलगुडेपि स्यात्१ गुडो गोलेक्षुपाकयोः२ ॥ सर्प्पमांसात्पशू व्याडौ२
गाभ्रुवा च क्ष्विडा ऽस्त्रीनाः३ ॥ क्ष्वेडा वंशशलाकापि१ नाडी कालेपि षट्क्षणे२ ॥ कांण्डोऽस्त्री दण्डबाणा
र्घावसरवारिषु६ ॥ स्याद्भाण्डमश्वाभरणेपात्रेमूलवणिग्धने३ ॥ ॥ इति डान्ता ॥ भ्रशप्रतिज्ञ
योर्बाढं२ प्रगाढं भृशकृच्छ्रयोः२ ॥ शक्तस्थूलौ त्रिषु दृढौ२ व्यूढो विन्यस्तसंहतौ२ ॥ ॥ इति ढान्ता ॥

राम: ७०

भ्रूणोऽर्भके स्त्रैणगर्भे वाणो वलिसुते शरे २ ॥ कणोऽतिसूक्ष्मे धान्यांशे संघाते प्रथमे गणः २ ॥
पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेपि च ४ ॥ मौर्व्यां द्रव्याश्रिते सत्वशुक्लसंध्यादिके गुणः ५ ॥
निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ३ ॥ वर्णो द्विजादौ शुक्लादौ स्तुतौ ३ वर्णन्तु वाक्षरे १ ॥ अ-
रुणो भास्करेपि स्याद्वर्णभेदेपि च त्रिषु २ ॥ स्थाणुः शर्वोप्यऽथ द्रोणः काकेप्याऽथ रवे रणः १ ॥ ग्रा-
मणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ३ ॥ ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः २ ॥ हरिणी स्या-
न्मृगी हेमप्रतिमा हरिता च या ॥ त्रिषु पाण्डौ च हरिणः ४ स्थूणा स्तंभेपि वेश्मनः १ ॥ तृष्णे स्पृहापि-
पासे द्वे जुगुप्सा करुणे घृणे २ ॥ वणिक्पथेपि विपणिः सुराप्रत्यक्च वारुणी २ ॥ करेणुरिभ्यां स्त्री ने-
भे द्रविणं तु बलं धनं २ ॥ शरणं गृहरक्षित्रोः २ श्रीपर्णं कमलेपि च १ ॥ विषाभिमरलोहेषु तीक्ष्णं क्ली-
वे खरे त्रिषु ४ ॥ प्रमाणं हेतुमर्य्यादाशास्त्रेयत्ताप्रमातृषु ५ ॥ करणं साधकतमं क्षेत्रगात्रेंद्रियेष्वपि ४ ॥

दूतिर्गीता

खमः
७१

प्राणकत्पादेरांसरणामसम्वाधवम्रगतौ ॥ घंटापथे ३ ऽथवात्तान्मेसमुद्धरणमुन्नये २ ॥ स्वतस्त्रिषुवि
र्गांस्यात्पथुर्म्ल[illegible]ङ्कं भदंष्ट्रयोः २ ॥ प्रवर्णाकमनिम्नो व्याम्युद्धेनात्तु चतुष्पथे २ ॥ सङ्ग्राहैसैनिचितामुद्धार
द्वीरणांभन्यमस्खरं २ ॥ ॥ इति णन्ताः ॥ ॥ देवसूर्यौ विवस्वंतौ २ सरस्वन्तौ नदार्णवौ २ ॥ पक्षिपार्श्वौ
गरुत्मन्तौ २ शकुन्तौ २ भासपक्षिणौ २ ॥ खगन्यत्पातौ धूमकेतु २ जीमूतौ मेघपर्वतौ २ ॥ हस्तौ तु पाणि
नक्षत्रे २ मरुतौ पवनामरौ २ ॥ यन्ता हस्तिपके सूते २ भर्त्ता धातरि पोष्टरि २ ॥ यानपात्रे शिशौ पोतः २ प्रे
तः प्राणंपन्नरमृते २ ॥ ग्रहभेदे ध्वजे केतु २ पार्थिवे तनये सुतः २ ॥ स्थपतिः कारुभेदेपि भूभृद्भूमिधरे
न्टपे २ ॥ मूर्द्धाभिषिक्तो भूपोपि १ भर्तुः स्त्री कुसुमेपि च २ ॥ विष्णावप्यजितव्यक्तौ ३ सूतस्त्वष्टरि सा
रथौ २ ॥ व्यक्तः प्राज्ञेपि १ दृष्टान्तावुभे शास्त्रनिदर्शने २ ॥ क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्र
द्रजे ३ ॥ वृत्तान्तः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः ४ ॥ आनर्त्तः समरे नृत्यस्थाननीवृद्विशेषयोः ३

रामः
७१

कृतान्तोयमसिद्धान्तदैवाकुशलकर्म्मसु ४ ॥ श्लेष्मादिरसरक्तादिमहाभूतानितद्गुणाः ॥ इन्द्रि
याण्यश्मविकृतिः शब्दयोनिश्च धातवः १ ॥ कक्षान्तरेऽपि शुद्धान्ते नृपस्यासर्व्वगोचरे २
कालसूत्रसामर्थ्ययोः शक्तिः २ मूर्त्तिः काठिन्यकाययोः २ ॥ विस्तारवल्ल्योर्व्रततिर्वसती रात्रिवे
श्मनोः २ ॥ क्षयार्च्चयोरपचितिः सातिर्दानावसानयोः २ ॥ अर्त्तिः पीडाधनुःकोट्योर्ज्जातिः सा
मान्यजन्मनोः २ ॥ प्रचारस्पन्दयोरीतिरीतिर्डिम्बप्रवासयोः २ ॥ उदयेऽधिगमे प्राप्तिस्त्रेता त्वग्नि
त्रये युगे २ ॥ वीणाभेदेपि महती भूतिर्भस्मनि संपदि २ ॥ नदीनगर्य्योर्न्नागानां भोगवत्यथ सं
गरे ॥ संगे सभायां समितिः क्षयवासावपि क्षितिः २ ॥ रवेरर्च्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ३ ॥
जगती जगति छन्दोविशेषेपि क्षितावपि ३ ॥ पंक्तिः छन्दोपि दशमं स्यात्प्रभावेपि चायतिः १ ॥ पत्ति
र्ग्गतौ च मूले तु पक्षतिः पक्षभेदयोः ३ ॥ प्रकृतिर्योनिलिंगे च कैशिक्याद्याश्च वृत्तयः १ ॥ सिकताः
स्युर्वालुकापि वेदे श्रवसि च श्रुतिः २ ॥ वनिता जनितात्यर्थानुरागायां च योषिति २ ॥ गुप्तिः क्षितिव्युदा

हेम्निरूप्या

अम: ७२

सोपि२ धृतिर्द्धारणधैर्य्ययोः२॥ बृहती क्षुद्रवार्त्ताकी छन्दोभेदे महत्यपि॥ वासिता स्त्रीकरिण्योश्च२
वार्त्ता वृत्तौ जनश्रुतौ२॥ वार्त्तं फल्गुन्यरोगेपि त्रिष्वप्सु च घृतामृते२॥ कलधौतं रूप्यहेम्नो२र्नि
मित्तं हेतुलक्ष्मणोः४॥ श्रुतं शास्त्रावधृतयो२र्युगपर्य्याप्तयोः कृतं२॥ अत्याहितं महाभीतिः कर्म्म
जीवानपेक्षि च४॥ युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु६॥ वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्त
ले७॥ महद्राज्यं चावगीतं जन्ये स्याद्गर्हिते त्रिषु२॥ श्वेतं रूप्येपि रजतं हेम्नि रूप्ये सिते त्रिषु३॥ त्रिषु
जगदिङ्गेपि रक्तं नील्यादि रागि च१॥ अवदातः सिते पीते शुद्धे३ बद्धार्जुनौ सितौ२॥ युक्तेऽतिसंस्कृ
ते मर्षिण्यभिनीतो३ऽथ संस्कृतः॥ कृत्रिमे लक्षणोपेतेप्य२ अनन्तोऽनवधावपि॥ ख्याते हृष्टे प्रतीतो२ऽभि
जातस्तु कुलजे बुधे२॥ विविक्तौ पूतविजनौ२ मूर्च्छितौ मूढसोच्छ्रयौ२॥ द्वौ चाम्लपरुषौ शुक्तौ२ शिती ध
वलमेचकौ२॥ सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्५॥ पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्र
तः कृते३॥ निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म्म यत्३॥ जातोद्धृतप्रवृद्धाः स्युरुच्छ्रिता३ उत्थितास्त्व
मी॥ वृद्धिमत्प्रोद्यतोत्पन्ना३ आदृतौ सादरार्च्चितौ२॥ ॥ इति तान्ताः॥ ॥ अर्थोऽभिधेयरैवस्तुप्रयोज

राम: ७२

नेनिर्द्दिष्टेत्रिषु५॥ निपानागमयोस्तीर्थमृषिजुष्टजलेगुरौ४॥ समर्थस्त्रिषुशक्तिष्ठेसम्बद्धार्थेहिते
पिच३॥ दशमीस्थौक्षीणरागवृद्धौ२ वीथीपदव्यपि२ ॥ आस्थानीयत्नयोरास्थास्या२ प्रस्थो३ स्त्रीसानुमान
योः२ इतिथान्ताः ॥ ॥ अभिप्रायवशौछन्दा२ वब्दौजीमूतवत्सरौ२॥ अपवादौतुनिन्दाज्ञेदायादौसुत
बान्धवौ२॥ पादारश्म्यङ्घ्रितुर्य्यांशाः३ चन्द्राग्न्यर्कास्तमोनुदः३॥ निर्वादोजनवादेपिशादोजम्बालशष्प
योः४॥ आरावेरुदितेत्रातर्य्याक्रन्दोदारुणेरणे५॥ स्यात्प्रसादोऽनुरोधेपि१ सूदःस्याद्व्यञ्जनेपिच१॥ गो
प्याध्यक्षेपिगोविन्दो१ हर्षेप्यामोदवन्मदः२॥ प्राधान्येराजलिङ्गेचवृषाङ्गेककुदोऽस्त्रियां३॥ स्त्रीसंवि
ज्ज्ञानसंभाषाक्रियाकाराजिनामसु५॥ धर्म्मेरहस्युपनिषत्स्यात्२ ऋतौवत्सरेशरत्२॥ पदंव्यवसिति
त्राणस्थानलक्ष्माङ्घ्रिवस्तुषु६॥ गोष्पदंसेवितेमानेप्रतिष्ठाकृत्यमास्पदं२॥ त्रिष्विष्टमधुरौस्वादू२
मृदूचातीक्ष्णकोमलौ२॥ मूढाल्पापटुनिर्भाग्यामन्दाःस्युः४ द्वौतुशारदौ॥ प्रत्यग्राप्रतिभौ२ विद्वत्सु
प्रगल्भौविशारदौ२॥॥ इतिदान्ताः॥ ॥ व्यामोवटश्चन्यग्रोधौ२ उत्सेधःकायउन्नतिः२॥ पर्य्याहार
श्चमार्गश्चविवधौवीवधौचतौ२॥ परिधिर्यज्ञियतरोःशाखायामुपसूर्य्यके२॥ बन्धकंव्यसनंचेतः

अम: पीडाधिष्ठानसाधयः२॥ स्कः समर्थनृनीचाक नियमाश्वसमाधयः३॥ दोषोत्पादेऽनुबन्धः स्यात्प्रकृ
७३ त्यादिषु नश्वरे॥ मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने५॥ विधुर्विष्णौ चन्द्रमसि२ परिच्छेदे बिलो
व्यधिः१॥ विधिर्विधाने दैवेपि२ प्रणिधिः प्रार्थने चरे२॥ बुधवृद्धौ पण्डितेपि२ स्कन्धः समुदयेपि का
ये नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियां४॥ विधा विधौ प्रकारे च२ साधू रम्येपि च त्रिषु१॥ वध्वाजा
या स्नुषा स्त्रीषु३ सुधा लेपोऽमृतं स्नुही४॥ सन्धा प्रतिज्ञा मर्यादा२ श्रद्धा संप्रत्ययः स्पृहा२॥ मधु मद्ये
पुष्परसे क्षौद्रे३ऽप्यन्धं तु तमस्यपि१॥ अतस्त्रिषु समुन्नद्धौ पण्डितंमन्यगर्वितौ२॥ ब्रह्मबन्धुरधिक्षेपे नि
र्देशेऽथावलम्बितः॥ अविदूरोऽप्यवष्टब्धः२ प्रसिद्धौ ख्यातभूषितौ२॥॥ इति धान्ताः॥॥ सूर्यवह्नी चि
त्रभानू२ भानू रश्मिदिवाकरौ२॥ भूतात्मानौ धातृदेहौ२ मूर्खनीचौ पृथग्जनौ॥ द्वौ सारथिहयारो
हौ२ वाजिनोऽश्वेषुपक्षिणः३॥ कुलेप्यभिजनो जन्मभूम्यामप्यथ हायनाः॥ वर्षार्चिर्व्रीहिभेदा रामः
श्च३ चन्द्राग्न्यर्कविरोचनाः३॥ केशेपि वृजिनो१ विश्वकर्मार्कसुरशिल्पिनोः२॥ आत्मा यत्नो धृतिर्बु ७३
द्धिः स्वभावो ब्रह्म वर्ष्म च॥ शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः३॥ अभिमानोऽर्थादिदर्पे ज्ञाने प्र

रायहिंसयोः४॥घनो मेघे मूर्त्तिगुणे त्रिषु मूर्त्ते निरंतरे४॥इनः सूर्ये प्रभौ राजा मृगांके क्षत्रिये
नृपे३॥वाणिन्यौ नर्त्तकीदूत्यौ स्रवंत्यामपि वाहिनी॥ह्रादिन्यौ वज्रतडितौ वंदायामपि का
मिनी२॥त्वग्देहयोरपि तनुः सूनाऽधोजिह्विकापि च१॥क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके॥मन्देऽथ
यकेतनं कृत्ये केतावुपनिमंत्रणेऽपि३॥वेदस्तत्वं तपो ब्रह्म३ ब्रह्मा विप्रः प्रजापतिः२॥उत्साह
ने च हिंसायां सूचने चापि गंधनं३॥आतञ्चनं प्रतीवापजवनाप्यायनार्थकं३॥व्यञ्जनं लाञ्छ
नं श्मश्रु निष्ठानावयवेष्वपि४॥स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणां२॥स्यादुद्यानं निःस
रणे वनभेदे प्रयोजने३॥अवकाशे स्थितौ स्थानं२ क्रीडादावपि देवनं२॥उत्थानं पौरुषे तंत्रे संनि
विष्टोद्गमेऽपि च४॥व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च२॥मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने॥
निर्वर्त्तनोपकरणानुव्रज्यासु च साधनं८॥निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च३॥व्यसनं वि
पदि भ्रंशे दोषे कामजकोपजे४॥पक्ष्माक्षिलोम्नि किञ्जल्के तंत्वाद्यंशेऽप्यणीयसि३॥तिथिभे

अमः
७४

दृक्सरोगपर्वरे२ वर्त्मनेत्रच्छदेऽध्वनि२ ॥ अकार्ये गुह्ये कौपीनं२ मैथुनं संगतौ रते२ ॥ प्रधानं परमा
त्मा धीः२ प्रज्ञानं बुद्धिचिह्नयोः२ ॥ प्रसूनं पुष्पफलयोः२ निधनं कुलनाशयोः२ ॥ क्रन्दने रोदनाह्वा
ने२ वर्ष्म देहप्रमाणयोः२ ॥ गृहदेहत्विट्प्रभावा धामान्य४ऽथ चतुष्पथे ॥ संनिवेशे च संस्थानं२ लक्ष्म
चिह्नप्रधानयोः२ ॥ आच्छादने संविधानमपवारणमित्युभे२ ॥ आराधनं साधने स्यादवा
प्तौ तोषणेऽपि च३ ॥ अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि४ ॥ रत्नं स्वजातिश्रेष्ठेऽपि वने स
लिलकानने२ ॥ तलिनं विरले स्तोके वाच्यलिङ्गमरऽथोत्तरे२ ॥ समानाः सत्समैके स्युः३ पिशुनौ खल
सूचकौ२ ॥ हीनन्यूनावूनगर्ह्यौ२ वेगिशूरौ तरस्विनौ२ ॥ अभिपन्नोऽपराद्धोऽभिग्रस्तव्याप
न्नतावपि३ ॥ ॥ इति नान्ता ॥ ॥ कलापो भूषणे बर्हे तूणीरे संहतेऽपि च४ ॥ परिच्छदे परीवापः पर्य
र्युप्तौ सलिलस्थितौ३ ॥ गोधुग्गोष्ठपती गोपौ२ हरविष्णू वृषाकपी२ ॥ बाष्पमूष्माश्रु२ कशिपु राम:
त्वन्नमाच्छादनं द्वयं२ ॥ तल्पं शय्याट्टदारेषु३ स्तम्बेऽपि विटपोऽस्त्रियां२ ॥ प्राप्तरूपस्वरूपाभिरूपा बु ७४

धमनोस्तयोः ३॥ भेद्यलिङ्गाश्च मी कूर्म्मीवीणाभेदश्च कच्छपी २॥ कुतपो मृगरोमोत्थपटे चाह्नोऽष्ट
मेऽंशके २॥ इति पान्ता ४॥ रवर्ण्णे पुंसि रेफः स्यात्कुत्सिते वाच्यलिङ्गकः २॥ शफं मूलेऽथ कूणं स्याद्ग
वाद्दीनां षुरे षुर ४॥ ॥ इति फान्ता ४॥ श्वत्तराभवसत्वेऽऽ वेगान्धर्व्वौ दिव्यगायने ३॥ कम्बुर्न्ना वलये
शङ्खे शङ्खजि॰ क्लौसर्पस्त्वचकोरः २॥ पर्व्वोन्यलिङ्गः प्राग्राहपुंस्त्वहुत्वेपि पर्व्वजानः २॥ इति वान्ता ४॥॥ कु
म्भो घटेभमूर्द्धांशौः २ डिम्भौ तु शिशुवालिशौः २॥ स्तम्भोस्थूणाजडीभावोः २ शम्भूर्ब्रह्मत्रिलोचनौः २॥ कुक्षि
भ्रूणार्भकागर्भाः ३ विश्रम्भः प्रणयेपि च १॥ स्याङ्द्ध्य्यो दुन्दुभिः पुंसि स्याद्देदुन्दुभिः स्त्रियां २॥ स्यान्म
हारजने क्लीवं कुसुम्भं करके पुमान् २॥ क्षत्रियेपि च नाभिर्न्ना २ सुरभिर्गवि च स्त्रियां १॥ सभासंसदि
सभ्येषु त्रिषु सभ्यः २ऽध्यक्षेपि वल्लभः १॥ ॥॥ इति भान्ता ॥॥ ॥ किरणप्रग्रहौ रश्मी २ कपिभेकौ प्लवङ्गमौ २॥ इ
ध्मा मनोभवौ कामौ २ शौर्य्ये द्युगोपराक्रमौ २॥ धर्म्मः पुण्ययमन्यायस्वभावाचारसोमपाः ६॥ उपाय
पूर्व्वआरम्भउपधावाप्युपक्रमः २॥ वणिक्पथः पुरं वेदो निगमा ३ नागरो वणिक् ॥ नैगमौ द्वौ स्वले

अमः रामोनीलचारुसितेत्रिषु४॥शब्दादिपूर्वोवृन्देपिग्रामः१क्रान्तौचविक्रमः१॥गुल्मारुक्स्तंम्बसेना
७५ श्चजाम्यामिःस्वसृकुलस्त्रियोः२॥क्षितिक्षान्त्योःक्षमायुक्तेक्षमंशक्तेहितेत्रिषु३॥त्रिषुश्यामौहरित्कृ
ष्णौश्यामास्याच्छारिवानिशा२॥ललामंपुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु५॥सूक्ष्ममध्यात्ममप्याद्ये
प्रधानेप्रथमस्त्रिषु१॥वामौवल्गुप्रतीपौद्वावधमौन्यूनकुत्सितौ२॥जीर्णंचपरिभुक्तंचयातयाम
मिदंद्वयं२॥॥इतिमान्ताः॥॥तुरङ्गगरुडौतार्क्ष्यौनिलयापचयौक्षयौ२॥श्वशुर्यौदेवरश्यालौभ्रा
तृव्यौभ्रातृजद्विषौ२॥पर्जन्यौरसदब्देन्द्रौ२स्यादर्य्यःस्वामिवैश्ययोः२॥तिष्यःपुष्येकलियुगे२पर्य्या
योऽवसरेक्रमे२॥प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु५॥रन्ध्रेशब्देऽथानुशयोदीर्घद्वेषानु
तापयोः४॥स्थूलोच्चयस्त्वसाकल्येनागानांमध्यमेगते२॥समयाःशपथाचारकालसिद्धांतसंविदः५॥
व्यसनान्यशुभेदैवंविपदित्यनयास्त्रयः३॥अत्ययोऽतिक्रमेकृच्छ्रेदोषेदण्डेप्य४ऽथापदि॥युद्धाय रामः
त्योःसंपरायः३पूज्यस्तुश्वशुरेपिच२॥पश्चादवस्थायिबलंसमवायश्चसन्नयौ२॥संघातेसन्निवे ७५

शेच सँस्त्यायः२ प्रणायास्त्वमी॥ विश्रंभयाच्चाप्रेमाणो विरोधेपि समुछ्रयः१॥ विषयोयस्ययो ज्ञात
स्तत्रशब्दादिकेष्वपि॥ निर्य्यासेपि कषायोऽस्त्री१ सभायाञ्च प्रतिश्रयः२॥ प्रायोभूम्न्यंतगमने२
मन्युर्दैन्ये क्रतौ क्रुधि३॥ रहस्योपस्थयोर्गुह्यं२ सत्यं शपथतथ्ययोः२॥ वीर्य्यं बलप्रभावौ च२ द्रव्यं
भव्ये गुणाश्रये२॥ धिष्ण्यं स्थाने गृहे भेऽग्नौ४ भाग्यं कर्म्म शुभाशुभं॥ कसेरुहेम्नोर्गांगेयं२ विश
ल्या दंतिकापि च२॥ वृषाकपायी श्रीगौर्य्योः२ अभिख्या नामशोभयोः२॥ आरंभो निष्कृतिः शिक्षा पूजनं
संप्रधारणं॥ उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः९॥ छाया सूर्य्यप्रिया कांतिः प्रतिविम्बमनातपः४॥ कक्ष्याप्र
कोष्ठे हर्म्यादेः काञ्च्यां मध्येभवन्धने३॥ कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः३॥ जन्यं स्याज्जनवा
देपि२ जघन्योऽन्त्येऽधमेपि च२॥ गर्ह्याधीनौ च वक्तव्यौ२ कल्यौ सज्जनिरामयौ२॥ आत्मवाननपेतोर्थाद
र्थ्यौ२ पुण्यं तु चार्वपि१॥ रूप्यः प्रशस्ते रूप्येपि२ वदान्यो वल्गुवागपि१॥ न्याय्येपि मध्यं सौम्यं तु सुन्दरे सो
मदैवते२॥ ॥ इति यांता४॥ निवहावसरौ वारौ२ संस्तरौ प्रस्तराध्वरौ२॥ गुरू गीःपतिपित्राद्यौ२ द्वापरौ
युगसंशयौ२॥ प्रकारौ भेदसादृश्ये२ आकाराविंगिताकृती२॥ किंसारुर्धान्यशूकेषुर मरू धन्वधरा

खमः धरौ २ ॥ स्वरुयोद्रुमसैलार्कीः ३ स्त्रीस्तनाब्दौपयोधरौ २ ॥ ध्वांतारिदानवा वृत्राः ३ बलिहस्तांशवः कराः ३ ॥
७६ प्रदराभङ्गनारिरुग्बाणाअस्त्राः कचा अपि ३ ॥ अजातशृंङ्गोगौः काले प्यश्मश्रुर्नाच तूवरौ २ ॥ स्वर्णे
पिराः १ परिकरः पर्य्यङ्कपरिवारयोः २ ॥ मुक्ताशुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु ॥ कर्वुरे २ ऽथप्र
तिज्ञाजिसम्बिदापत्सु संङ्गरः ४ ॥ वेदभेदे गुप्तिवादे मंत्रो मित्रो रवावपि ॥ मखेषु यूपखण्डेषु स्वरु
र्गुह्येऽथ वस्करः १ ॥ आडम्बरस्तूर्य्यरवे गजेन्द्राणाञ्च गर्ज्जिते २ ॥ अभिहारोऽभियोगे च चौर्य्ये संन्नह
नेपि च ३ ॥ स्याजङ्गमे परीवारः खड्गकोशे परिच्छदे ३ ॥ विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनं ३ ॥ द्वारि
द्वाःस्थे प्रतीहारः प्रतीहार्य्यप्यनंतरे २ ॥ विपुले नकुले विष्णौ बभ्रुः स्यात्पिङ्गले त्रिषु ४ ॥ सारो बले स्थिरां
शे च न्याय्ये क्लीवं वरे त्रिषु ४ ॥ दुरोदरो द्यूतकारे पणे द्यूते दुरोदरं ३ ॥ महारण्ये दुर्गपथे कांतारं पुंन्न
पुंसकं २ ॥ मत्सरोन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ३ ॥ देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं म्मनाक्प्रिये ३ ॥ वं
शाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ३ ॥ ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियां २ ॥ यमानिलेन्द्रचन्द्रा रामः
र्कविष्णुसिंहांशुवाजिषु ॥ शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिषु ४ ॥ शर्करा कर्परांशेपि यात्रा स्या ७६

घापनेगतौ२॥ द्रूाभ्रवाकसुरासुस्या४ तन्द्रीनिद्राप्रमीलयोः२॥ धात्रीस्यादुपमातापिक्षितिरप्यामलक्यपि॥
क्षुद्रांव्यङ्गानटीवेश्यासरघाकण्ठकारिकाः॥ त्रिषुक्रूरेऽधमेऽल्पेपिक्षुद्रं५ मात्रापरिछदे॥ अल्पेचपरि
माणेसामात्रंकार्त्स्न्येऽवधारणे४॥ आलेख्याश्चर्य्ययोश्चित्रंकलत्रंश्रोणिभार्य्ययोः२॥ सुरवांशेकौलंहलयो
योग्यभाजनयोःपात्रंस्पत्रंवाहनपक्षयोः२॥ निर्दृशायग्रन्थयोःशास्त्रंश्शस्त्रमायुधलोहयोः२॥ स्याज्जटां
खा५ शुकयोर्न्नेत्रंक्षेत्रंपत्नीशरीरयोः२॥ मुखाग्रेकोलहलयोःपोत्रं२ गोत्रंतुनाम्निच१॥ सत्रमाछादनेयज्ञेस
दादानेवनेपिच४॥ अजिरंविषयेकार्य्येप्य२ऽम्बरंव्योम्निवाससि२॥ चक्रंराष्ट्रेप्य२ऽक्षरंतुमोक्षेपि१ क्षीरम
प्सुच॥ स्वर्णेपिभूरिचन्द्रौद्वौहारमात्रेपिगोपुरं१॥ गुहादम्भौगह्वरेद्वे२ रहोन्तिकमुपह्वरे२॥ पुरोधिकमुपर्य्य
ग्राणिपर२ऽगारेनगरेपुरं॥ मन्दिरंचाऽथराष्ट्रोऽस्त्रीविषयेस्यादुपद्रवे२॥ दरोऽस्त्रियांभयेश्वभ्रेवज्रोऽस्त्री
हीरकेपवौ२॥ तन्त्रंप्रधानेसिद्धान्तेसूत्रवायेपरिछदे४॥ कुसिरस्त्वामेरंद्रोण्योसीरंशायनासनेर॥ पु
ष्करंकरिहस्ताग्रेवाद्यभाण्डमुखेजले॥ व्योम्निखड्गफलेपद्मेतीर्थौषधिविशेषयोः८॥ क्लीबेरतसिंशुक्रो

अमः ७७

नाभार्गवे ज्येष्ठे वप्रे बुधे ४ ॥ अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये छिद्रात्मीयविनावहिरवसर
मध्येन्तरात्मनि च ३ ॥ मुस्तेपि पिठरं राजकसेरुण्यपि नागरं ॥ शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकः २ ॥
गौरोरुणे सिते पीते ३ व्रणकार्य्यप्यरुःकरः १ ॥ जठरः कठिनेपि स्यादधस्तादपि चाधरः १ ॥ अनाकुलेपि
चैकाग्रो व्यग्रो व्यासक्त आकुले २ ॥ उपर्य्युदीच्यश्रेष्ठेष्वप्युत्तरः ३ स्यादनुत्तरः ॥ एषां त्वविपर्य्ययेश्रेष्ठे २ दूरा ना
त्मोत्तमाः पराः ३ ॥ स्वादुप्रियौ तु मधुरौ २ क्रूरौ कठिननिर्द्दयौ २ ॥ उदारो दातृमहतोः २ इतरस्त्वन्यनीचयोः २ ॥
मन्दस्वच्छन्दयोः स्वैरः २ शुभ्रमुद्दीप्तशुक्लयो ॥ ॥ इति रान्ताः ॥ चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ३ ॥
द्रुमप्रभेदमातङ्गकाण्डपुष्प्याणि पीलवः ४ ॥ कृतान्तानेहसोः कालः २ चतुर्थेपि युगे कलिः १ ॥ स्यात्कुरङ्गेपि
कमलः १ प्रावारेपि च कम्बलः १ ॥ करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियां ३ ॥ स्थौल्यसामर्थ्यसैन्येषु बलं
ना काकसीरिणोः ५ ॥ वातुलः पुंसि वात्यायामप्यये वातासहे त्रिषु २ ॥ भेद्यलिङ्गः शठे व्यालः पुंसि श्वापद
सर्प्पयोः ३ ॥ मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधं २ ॥ शङ्कौ चापि द्वयोः कीलः १ पालिः स्त्र्यश्र्यङ्क
पङ्क्तिषु ३ ॥ कला शिल्पे कालभेदेप्याली सख्यावली अपि २ ॥ अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ४ रामः ७७

वकुलाः क्लान्तिका गावो वल्कलो ऽस्त्रि शितौ त्रिषु ४ ॥ लीलाविलासक्रिययोरुपला शर्करापि च ॥ शो
णितेंऽभसि कीलालं मूलमाद्ये शिफाभयोः २ ॥ जालं समूह आनायगवाक्षक्षारकेष्वपि ४ ॥ शीलं स्व
भावे सद्वृत्ते सस्ये हेतुकृते फलं ३ ॥ छर्दिनेत्ररुजोः क्लीवं समूहे पटलं न ना ३ ॥ अधः स्वरूपयोरस्त्री तलं
स्याच्चामिषे पलं २ ॥ कुद्दानलेपि पातालं चेलं स्वल्पे ऽधमे त्रिषु २ ॥ कुकूलं शंकुभिः कीर्णे श्वभ्रे नातु
तुषानले २ ॥ निस्त्रिंशे केवलमिति लिंगं २ चारौ दक्षे च पेशलः २ ॥ मूर्खेऽर्भकेपि बालः स्याल्लोलश्चलसतृ
ष्णयोः २ ॥ ॥ इति लान्ताः ॥ ॥ देवृदेवौ वनारण्यवह्नी जन्महरौ भवौ २ ॥ मंत्री सहायः सचिवौ २ पतिशा
खिनरा धवाः ३ ॥ अवयः शैलमेषार्का आज्ञाह्वानाध्वरा हवाः ३ ॥ भावः सत्तास्वभावाभिप्रायचेष्टात्म
जन्मसु ६ ॥ स्यादुत्पादफले पुष्पे प्रसवो गर्भमोचने ४ ॥ अविश्वासेऽपह्नवेपि निकृतावपि निह्नवः ३ ॥
उत्सेकामर्षयोरिच्छाप्रसरे मह उत्सवः ४ ॥ अनुभावः प्रभावे च सतां च मतिनिश्चये २ ॥ स्याज्जन्महेतुः
प्रभवः स्थानं चाद्योपलब्धये २ ॥ शूद्रायां विप्रतनये शस्त्रे पारशवः पुमान् २ ॥ ध्रुवो भृभेदे क्लीवे तु निश्चि
ते शाश्वते त्रिषु ३ ॥ स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो ऽस्त्रियां धने ४ ॥ स्त्रीकटीवस्त्रबन्धेपि नीवी परिपणेपि

अम॰ चर॥ शिखा मौलिकिरवयोः२ द्वन्द्वं कलहयुग्मयोः२॥ द्रव्यासुव्यवसायेष्वपि सत्त्वमस्त्री तु जन्तुषु४॥ क्लीबे नपुंस
७८ कं शण्ठे वाच्यलिङ्गमविक्रिये२॥ ॥ इति वान्ताः॥ ॥ द्वौ विशौ वैश्यमनुजौ२ द्वौ चराभिमरौ स्पशौ२॥ द्वौ राशी
पुञ्जमेषाद्यौ२ द्वौ वंशौ कुलमस्करौ२॥ रहः प्रकाशौ नीकाशौ२ निर्वेशौ भृतिभोगयोः२॥ कृतान्ते पुंसि
कीनाशः क्षुद्रकर्षकयोस्त्रिषु३॥ पदे लक्ष्ये निमित्तेऽपदेशः३ स्यात्कुशमप्सु च१॥ दशाऽवस्थानेकविधाऽप्या
शा तृष्णापि चायता१॥ वशा स्त्री करिणी च स्यात्२ दृग्ज्ञाने ज्ञातरि त्रिषु२॥ स्यात्कर्कशः साहसिकः कठोर
मसृणावपि३॥ प्रकाशोऽतिप्रसिद्धेपि२ शिशावज्ञे च बालिशः२॥ ॥ इति शान्ताः॥ ॥ सुरमत्स्यावनिमि
षौ२ पुरुषावात्ममानवौ२॥ काकमत्स्यात्खगौ ध्वाङ्क्षौ२ कक्षौ तु तृणवीरुधौ२॥ अभीषुः प्रग्रहे रश्मौ२ प्रैषः
प्रेषणमर्दने२॥ पक्षः सहायेऽप्युष्णीषः शिरोवेष्टकिरीटयोः२॥ शुक्लेऽमरखिके श्रेष्ठे सुकृते वृषभे वृषः५॥
कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः४॥ द्यूते ~~वे तत्क्रियायाञ्च पौरुषं२ विषमप्सु~~ ऽक्षे सारिफल
केऽप्याकर्षोऽथाक्षमिन्द्रिये॥ ना द्यूताङ्गे च कर्षे च व्यवहारे कलिद्रुमे५॥ कर्षूर्द्वौ स्त्री करीषाग्निः कर्षूः अम॰
कुल्याभिधायिनी३॥ पुंभावे तत्क्रियायाञ्च पौरुषं२ विषमप्सु च१॥ उपदानेप्यामिषं स्यादपराधेपि ७८

किल्बिषं॥ स्याद्धृष्टो लोकधात्वंशे वत्सरे वर्षमस्त्रियां३॥ प्रेक्षा नत्येक्षणे प्रज्ञा२ भिलाषे वार्थना
भ्यर्तिः२॥ त्विट् शोभापि१ त्रिषु परे न्यक्षं कार्त्स्न्यनिकृष्टयोः२॥ प्रत्यक्षेऽधिकृतेऽध्यक्षो२ रूक्षस्त्व
प्रेम्ण्यचिक्कणे२॥ ॥ ॥ ॥इति षान्ताः ॥ रक्षश्चैतद्द्वयोर्हंसो२ सूर्यवह्नी विभावसू२॥ वत्सौ तर्णकवर्षौ द्वौ
सारङ्गाश्च दिवौकसः१॥ शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः६॥ पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेपि
शेखरे२॥ देवभेदेऽनले रश्मौ वसू रत्ने धने वसु५॥ विष्णौ च वेधाः१ स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः२॥
लालसे प्रार्थनौत्सुक्ये हिंसा चौर्यादिकर्मसु३॥ प्रसूरश्वापि१ भूर्द्यावो रोदस्यौ रोदसी च ते२॥ ज्वाला
भासोर्न पुंस्यर्चिर्ज्योतिर्भद्योतदृष्टिषु३॥ पापापराधयोरागः२ खगवाल्याद्ययोर्वयः२॥ तेजः पुरीष
योर्वर्चो२ महस्तूत्सवतेजसोः२॥ रजो गुणे च स्त्रीपुष्पे२ राहौ ध्वान्ते गुणे तमः३॥ छन्दः पद्येऽभिलाषे च२ त
पः कृच्छ्रादिकर्मसु१॥ सहो बलं सहा मार्गो२ नभः खं श्रावणो नभाः२॥ रुकः सद्माश्रयश्चोकः२ पयः
क्षीरं पयोऽम्बु च२॥ नुजो दीप्तौ बले२ श्रोत इन्द्रिये निम्नगारये२॥ तेजः प्रभावे दीप्तौ च बले शुक्रेप्य४ऽतस्त्रिषु

अमः ७६

विद्वान्विदंश्च बीभत्सो हिंस्रोप्यतिशये त्वमी॥ वृद्धप्रशस्तयोर्ज्यायान्कनीयांस्तु युवाल्पयोः२॥
वरीयांस्तूरुवरयोः२ साधीयान्साधुबाढयोः२॥१॥ ॥इति सांताः॥ ॥ दलेपि बर्हं निर्बन्धोपरागार्का-
दयो ग्रहाः३॥ द्वार्यापीडे क्वाथरसे निर्यूहो नागदंतके४॥ तुलासूत्रेश्वादिरश्मौ प्रग्रहः प्रग्रहोपि
च२॥ पत्नीपरिजनादानमूलशापाः परिग्रहाः५॥ दारेष्वपि गृहाः१ श्रोण्यामप्यारोहो वरस्त्रियाः१॥
व्यूहो वृंदेप्यहिर्वृत्रेप्यग्नींद्वर्कास्तमोपहाः३॥ परिच्छदे नृपार्हर्थे परिबर्होव्ययाः परे२॥ आ
ङीषदर्थेभिव्याप्तौ सीमार्थे धातुयोगजे॥ आ प्रगृह्यः स्मृतौ वाक्येप्यास्तु स्यात्कोपपीडयोः५॥ पा
पकुत्सेषदर्थे कु३ धिग्निर्भर्त्सननिंदयोः२॥ चान्वाचयसमाहारेतरेतरसमुच्चये४॥ स्वस्त्याशीःक्षेम
पुण्यादौ३ प्रकर्षे लंघनेप्यति२॥ स्वित्प्रश्ने च वितर्के च२ तु स्याद्भेदेवधारणे२॥ सकृत्सहैकवारे२
चाप्याराद्दूरसमीपयोः२॥ खेदानुकम्पासंतोषविस्मयामंत्रणे बत५॥ हन्त हर्षेनुकंपायां वाक्या
रंभविषादयोः४॥ प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः३॥ इति हेतुप्रकरणप्रकारादिसमा

इति हांताः॥ इति नानार्थवर्गः॥

अमः ७६

प्रियेषु ५॥ प्राच्यां पुरस्तात्प्रथमे स्यात्पुरोऽर्थेऽग्रत इत्यपि १॥ यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ४॥ मङ्ग
लानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ५॥ वृथा निरर्थकाविध्योर्नानानेकोभयार्थयोः २॥ नु पृच्छायां वि
कल्पे च २॥ पश्चात्सादृश्ययोरनु २॥ प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु ४॥ गर्हासमुच्चयप्रश्नशङ्कासं
भावनास्वपि ५॥ उपमायां विकल्पे वा २ सामि त्वर्द्धे जुगुप्सिते २॥ अमा सह समीपे च २ कम्वारिणि च मू
र्द्धि च २॥ इवेत्थमर्थयोरेवं २ नूनं तर्केऽर्थनिश्चये २॥ तूष्णीमर्थे सुखे जोषं २ किं पृच्छायां जुगुप्सने २॥ ना
म प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ५॥ अलं भूषणपर्याप्तिशक्तिवारणवाचकं ४॥ हुं वितर्के
परिप्रश्ने २ समयान्तिकमध्ययोः २॥ पुनरप्रथमे भेदे २ निर्निश्चयनिषेधयोः २॥ स्यात्प्रबन्धे चिरा
तीते निकटागामिके पुरा ३॥ ऊर्युररी चोररी च विस्तारेऽङ्गीकृतौ त्रयं ३॥ स्वर्गे परे च लोके स्वर्वार्ता
संभाव्ययोः किल २॥ निषेधवाक्यालङ्कारजिज्ञासानुनये खलु ४॥ समीपोभयतः शीघ्रसाकल्याभि
मुखेऽभितः ५॥ नाम प्राकाश्ययोः प्रादुर्मिथोऽन्योन्यं रहस्यपि २॥ तिरोऽन्तर्द्धौ तिर्यगर्थे २ हा विषाद
शुगार्त्तिषु ३॥ अहहेत्यद्भुते खेदे २ हि हेताववधारणे २॥ ॥ ॥ अव्ययेष्वेकार्थवर्गः॥ ॥ चिराय चिररात्रा

श्लोके १

श्रीशीघ्रदीर्घकालस्य २

परस्परलोकविरुद्धकाण्ड ८

सकृत्तत्कालार्थस्य२ आदिनाचिरं चिरेण चिरात् चिरे इति ग्रहणं ते   प्रकृष्टातिशयस्य२   पंचयोनः पुनस्यार्थस्य१   त्रीणि सामष्यस्य६

रामः ८०

यचिरस्याद्यांश्चिरार्थकाः३॥ मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः५॥ मनाक्स्राग्झटित्यंजसाह्नाय
सपदि द्राग्मंक्षु च द्रुते७॥ बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे५॥ पृथग्विनान्तरेणर्ते हिरुङ्नाना च
वर्जने६॥ यत्तद्यतस्ततो हेतौ४॥ असाकल्ये तु चिच्चन२॥ कदाचिज्जातु२ सार्द्धं तु साकं सत्रा समं सह५॥ आ
नुकूल्यार्थकं प्राध्वं१ व्यर्थके तु वृथा मुधा२॥ आहो उताहो किमुत वितर्के किं किमूत च६॥ तु हि च स्म ह
वै पादपूरणे६ पूजने स्वती२॥ दिवाह्नीत्य१थ दोषा च नक्तं च रजनाविति२॥ तिर्यगर्थे साचि तिरो२प्यथ
संबोधनार्थकाः॥ स्युः प्याट् पाडङ्ग हे है भोः६ समया निकषा हिरुक्३॥ अतर्किते तु सहसा१ स्यात्पुरः
पुरतोऽग्रतः३॥ स्वाहा देवहविर्दाने श्रौषड्वौषड्वषट्स्वधा१॥ किंचिदीषन्मनागल्पे३ प्रेत्यामुत्र भवान्तरे२॥
व द्वा यथा तथैवैवं साम्ये६ अहो ही च विस्मये२॥ मौने तु तूष्णीं तूष्णीकं२ सद्यः सपदि तत्क्षणे४॥ दिष्ट्या
समुपजोषं चेत्यानन्दे२ अथान्तरेऽन्तरा॥ अन्तरेण च मध्ये स्युः प्रसह्य तु हठार्थकं१॥ युक्ते द्वे सांप्रतं स्था
ने२ अभीक्ष्णं शश्वदनारते२॥ अभावे नह्यनो नापि५ मास्म मालं च वारणे३॥ पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धा
ञ्जसा द्वयं२॥ प्राकाश्ये प्रादुराविः स्या२दोमेवं परमं मते२॥ समन्ततस्तु परितः सर्वतो विष्वगित्यपि४

रामः ८०

द्वे निरंतरे२   द्वे स्फुटार्थे१   द्वे पक्षे२ स्य   चत्वारि सर्वतः स्यर्थे१

श्चकामानुमतौकामः१मसूयोपगमेऽस्तुच१॥ननुचस्याद्विरोधोक्तौ१कच्चित्कामप्रवेदने१॥निःष
मंदुःषमंगर्ह्ये२यथास्वंतुयथायथं२॥मृषामिथ्याचवितथे३यथार्थंतुयथातथं२॥स्युरेवंतुपु
नर्वैवेत्यवधारणवाचकाः४॥प्रागतीतार्थकं१नूनमवश्यंनिश्चयेद्वयं२॥सम्वद्वर्षे१ऽवरे
त्वर्वाक्१आमेवं१स्वयमात्मना१॥अल्पेनीचैः१र्महत्तूच्चैः१प्रायोभूम्नि१अद्रुतेशनैः१॥सनानित्ये१बहि
र्बाह्ये१स्मातीते१ऽस्तमदर्शने१॥अस्तिसत्वे१रुषोक्तावु१ऊंप्रश्ने१ऽनुनयेत्वयि१॥हुंतर्के१स्यादुषारात्रेरव
साने१नमोनतौ१॥पुनरर्थेऽङ्ग१निन्दायांदुष्टु१सुष्टुप्रसंसने१॥सायंसाये१प्रगेप्रातःप्रभाते१निकषान्
तिके१॥परुत्परार्य्यैषमोऽब्दे१पूर्वेपूर्वतरेयति१॥अद्यात्राह्न्यथपूर्वेऽह्नीत्यादौपूर्वोत्तरापरात्॥तथाधरा
न्यान्यतरेतरात्पूर्वेद्युरादयः७॥उभयद्युश्चोभयेद्युः२परेत्वह्निपरेद्यवि१॥ह्योगते१ऽनागतेऽह्निश्वः१प
रश्वस्तुपरेहनि१॥तदातदानीं२युगपदेकदा२सर्वदासदा२॥एतर्हिसंप्रतीदानीमधुनासांप्रतंतथा५॥
दिग्देशकालेपूर्वादौप्रागुदक्प्रत्यगादयः३॥ ॥ ॥अव्ययवर्गः४॥ ॥सलिङ्गशास्त्रैःसंनादिकृत्तद्धितसमा
सजैः॥अनुक्तैःसङ्ग्रहेलिङ्गंसंकीर्णवदिहोन्नयेत॥लिङ्गशेषविधिर्व्यापीविशेषैर्य्यद्यबाधितः॥स्त्रियामी

श्रमः ऋद्धिरामैकारवसयोन्निपाणिनामव ॥ नामविद्युन्निशावल्लीवीणादिग्भूनदीह्रियां ॥ अदंतैर्द्विगुरेकार्थो
८१ नसपात्रयुगादिभिः ॥ तलवृन्देयेतिकघत्रावैरमैथुनिकादिवुन ॥ स्त्रीभावादावनिक्तिनएवुलणच्वुञ्क्य
पोयुजङिक्विनिशाः ॥ उणादिषुनिरूरीश्चङ्याबूङन्तंचलंस्थिरं ॥ तत्क्रीडायांप्रहरणंचेन्मौष्टापाल्लवागा
दिकर ॥ घञोऽञः साक्रियाऽस्यांचेद्दाण्डपाताहिफाल्गुनी ॥ श्यैनयातावमृगयातैलंपातास्वधेतिदिक ॥
स्त्रीस्यात्काचिन्मृणाल्यादिर्विवक्षापचयेयदि ॥ लङ्कासेफालिकाठीकाधातकीपंजिकाढकी ॥ ॥ सिध्र
कासारिकाहिक्काप्राचिकोल्कापिपीलिका ॥ तिंदुकीकणिकाभंगीः सुरंगासूचिमाढयः ॥ पिच्छा
वितंडाकाकिण्यश्चूर्णिः शाणीद्रुणीदरत ॥ सातिः कंथातथासंदीनाभीराजसभापिच ॥ झल्लरी
चर्चरीपारीहोरालट्वाचसिध्मला ॥ लाक्षालिक्षाचगंडूषागृध्रसीचमसीमसी ॥ ॥ इतिस्त्रीलिंगशे
षः ॥ ॥ पुंस्त्वेसभेदानुचराः सपर्यायाः सुराऽसुराः ॥ स्वर्गयागाऽद्रिमेघाब्धिद्रुकालाऽसिशराऽरयः
करगंडोष्ठदोर्दंतकंठकेशनखस्तनाः ॥ अह्नाहांताः क्षेडभेदारात्रांताः प्रागसंख्यकाः ॥ स्त्रीवेष्टा रामः
घोषानियोसाग्रसमंताव्रवाधिता४ ॥ कशेरुजतुवस्तूनिहित्वातुरुविरामकाः ॥ कषणभमरो ८१

पांतायघदं तान्त्रथमीस्थुपथ॥पथ न यसठोपांतागोत्राख्याश्चरणाह्वयाः॥नाम्न्यकर्त्तरि भावे च घञ्जबनघ
घाथुचः॥स्नुक्रतेरीरीमनिझावेकोघोःकिःप्रादितोन्यतः॥द्वंद्वेश्ववडवौऽश्ववडवानसमाहृते॥कांतःसू
र्येंदुपर्यायःपूर्वोयःपूर्वकोपिच॥वटकश्चानुवाकश्चरल्लकश्चकुडंगकः॥पुंखोन्युंखःसमुद्गश्चवि
टपदध्वटाःखट्टः॥कोट्टारहट्टहट्टाश्चपिंडगोडपिचिंडवत्॥गडुःकरंडोलगुडोवरंडश्चकिणोघुणः॥दृ
तिसीमंतहरितोरोमंथोद्गीथबुद्बुदाः॥कासमर्दोर्बुदःकुंदःफेनस्तूपौसयपयकौ॥स्वातपःदात्रियेना
भिःकुणपक्षुरकेदाराः॥पूरक्षुरप्रचुक्रोश्चगोलहिंगुलुपुद्गलाः॥वेतालमल्लभल्लाश्चपुरोडाशोपिप
ट्टिशाः॥कुल्माषोरभसश्चैवसकटाहःपतद्ग्रहः॥ इतिपुंल्लिंगसंग्रहः ॥॥ द्विहीनेन्यच्चखारणपपरार्थ
मर्द्दिमोदकं॥शीतोष्णमांसरुधिरमुखाक्षिद्रविणंबलं॥फलहेमशुल्वलोहसुखदुःखशुभाशुभं
जलपुष्पाणिलवणंव्यंजनान्यनुलेपनं॥कोट्याःशतादिसंख्यान्यावलक्षावानियुतंचतत्॥द्व्यच्कंमसि
सुसन्नंतंयदन्नांतमकर्तरि॥त्रांतंसलोपधंशिष्टंरात्रंप्राक्संख्ययान्वितं॥पात्राद्यदंतैरेकार्थोद्विगुर्ल
क्ष्यानुसारतः॥द्वंद्वैकत्वाव्ययीभावौपथःसंख्याव्ययात्परः॥षष्ठ्याश्छायाबहूनांचेद्विच्छायंसंहतौ

अम: सभा॥ शालार्थापि परां राजोऽमनुष्यार्थादराजकात॥ दासीसभं नृपसभं रक्षःसभमिमा दिशः॥ उपज्ञोप
८२ क्रमांतश्च तदादित्वप्रकाशने॥ कोपज्ञं कोपक्रमादिकंथोशीनरनामसु॥ भावे न णकचिद्भ्योऽन्ये समू
हे भावकर्मणोः॥ तदंतप्रत्ययाः पुण्यादि सुनाभ्यां त्वहः परः॥ क्रियाव्ययानां भेदकान्येकत्वेप्युतोदके
श्चौवं मुक्तं गृहस्थूणं तिरीटं मर्म योजने॥ राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः॥ माणिक्यं भाष्यसिं
दूरं चीरचीवरपंजरं॥ लोकायतं हरीतालं विदलं स्थालवाह्लवं॥ ॥इति नपुंसकलिंगसंग्रहः॥ पुं
नपुंसकयोः शेषोऽर्धर्चपिण्याककंटकाः॥ मोदकस्तंडकष्टंकः शाठकः खर्वटोऽर्बुदः॥ पातकोद्योगचर
कतमालामलकानडः॥ कुष्टं मुंडं सीधुबुस्तक्ष्वेडितं क्षेमकुट्टिमं॥ संगमं शतमानार्मशंबलाऽव्य
यताडवं॥ कवियं कंदकार्पासं पारावारं युगंधरं॥ यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ॥ अर्धर्चादौ
घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवं॥ तन्नोक्तमिह लोकेपि तच्चेदस्त्यस्तु शेषवत॥ ॥इति पुंनपुंसकसंग्रहः॥ राम
स्त्रीपुंसयोरपत्यांतद्विचतुःषट्पदोरगाः॥ जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः॥ मुनिर्वराटकः ८२
स्वातिर्वर्त्तकोराटलिर्मनुः॥ मूषा सृपाटीकर्कंधूर्यष्टिः शाटीकषकुटी॥ इति पुंस्त्रीलिंगसंग्रहः॥ ॥स्त्रीन

पुंसकयोर्भावक्रिययोः ष्यञ्क्वचित्त्ववुञ् ॥ औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृत ॥ षष्ठ्यंतत्पा
क्पदाःसेनाछायाशालासुरानिशाः ॥ स्याद्वानृसेनंश्वनिशं गोशालमितरे च दिक ॥ स्त्राबंतोत्तर
पदोद्विगुश्चापुंसि नश्च लुप ॥ त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ स्त्रीनपुंसकलिङ्गशेष ॥ ॥ त्रिषु
पात्रीपुटीवाटीपेटीकुवलदाडिमौधिः ॥ त्रिलिङ्गशेष ॥ ॥ परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेपि तत् ॥ अर्थान्ताः
प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ॥ तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ॥ बहुव्रीहिरदिङ्नाम्नामु
न्नेयं तदुदाहृतं ॥ गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ कृतः कर्त्तर्यसंज्ञायां कृत्याः कर्त्तरि कर्म्म
णि ॥ अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययं ॥ परं वि
रोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ॥ लिङ्गादिसंग्रहवर्गः ॥ ॥ नानाकवीनां यद्यपि नामकोषाः संत्येव श
ब्दार्थविदां प्रधानाः ॥ तथापि सत्कौऽमरसिंहनाम्नः कवेरतिप्रथितं म्मनोनः ॥ पद्मानि बोधयत्य
र्कः काव्यानि कुरुते कविः ॥ तत्सौरभं नभस्वन्तः सन्तस्तन्वन्ति तद्गुणान् ॥ ॥ ॥ ॥ इत्यमरसिंहकृतौ ना
मलिङ्गानुशासने सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥ ॥ शुभमस्तु ॥ शाके [redacted] खरवनसप्तेन्दु

१७००

स्वमः ८३ कर्कस्थे च दिवाकरे ॥ श्वग अश्वसिततीथ्ये च रेवत्यां गुरुवासरे ॥ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं
मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ ॥ भग्नपृष्ठिः कटिग्रीवा वक्रदृष्टिरधोमुखं ॥ कष्टेन लि
खितं शास्त्रं पुत्रवत् परिपालयेत् ॥ ॥ तैलाद्रक्षेज्जलाद्रक्षेद् रक्षेत् शीतलबंधनात् ॥ मूर्खहस्ते न दातव्यं इत्येवं वदति पु
स्तकं ॥ ॥ मङ्गलं मङ्गलं मिङ्गलमिति ॥ ॥ ॥ सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे ॥ चेरेनागुरुकस्तूरिकपूरैर्व्य
स्त कर्दमः ॥ ॥ श्वतिहृष्टि रनाहृष्टिः शलभा मूषकाः शुकाः ॥ प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥ ॥
१० सदानन्दस्य शास्त्रज्ञः निर्मलो स्फटिको तथा ॥ श्यात्मजः श्रीविष्णवस्य ज्योतिशास्त्रप्रवर्त्ततेः ॥ ॥ लिख
कपुस्तकं पठनार्थं ॥ शुभं ॥ ॥ रामः रामः रामः ॥ ॥ ॥ श्रीरस्तु ॥ ॥ ॥ शुभमस्तु ॥ शुभं ॥ ॥
श्रीरामेति रामभद्रेति रामचंद्रेति वा स्मर

राम ८३

(6)

अमरकोषः शक १७००

Amarkosh. . Sak. 1700.